द्विवद स्तनुदृष्टांप्रस्तुतासाधारणवृत्तांतउपात्तो[illegible]। नापि श्लिष्टसाधारणादिविशेषणसमर्पितयोः प्र

स्तुताप्रस्तुतवृत्तांतयोः अप्रस्तुतवृत्तांतस्य[illegible]। नापि तस्य विद्युन्नयनवत्प्राधान्यमस्ति। येन तदनुरो

धात्वं सेतुर्बंध[illegible]रूढित्यत्र वप्रस्तुते प्रस्तुतरूपसमारोपमभ्युपगच्छेम। तस्मात् द्विशेषणसमर्पिताप्रस्तु

तव्यवहारसमारोपमात्रमिह चारुताहेतुः। यद्यपि प्रस्तुताप्रस्तुतवृत्तांतयोरिह श्लिष्टसाधारणवि

शेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्येणैव साक्षादन्वयादस्ति समप्राधान्यं

तथाप्यप्रस्तुतवृत्तांतान्वयानुरोधान्नाप्रस्तुते प्रस्तुतरूपसमारोपोंगीकार्यः। तथाहि। यथा प्रस्तु

तविशेष्ये प्रस्तुतवृत्तांतस्यान्वययोग्यता तथैवाप्रस्तुतेपि जारादौ नास्ति प्रस्तुतवृत्तांतस्या[illegible]न्वययो

ग्यता। एवं च समप्रधानयोः प्रस्तुताप्रस्तुतवृत्तांतयोरन्यतरस्यावश्यमारोपेऽभ्युपगंतव्ये प्रस्तुतस्यैव

प्रस्तुते[illegible] प्रस्तुतवृत्तांतस्यारोपश्चारुताहेतुरिति युक्तं॥ नन्वेवं सति विशेषणसाम्यादप्रस्तुतस्य ग

म्यत्वं समासोक्तिः विशेषणानां साम्येन यत्र प्रस्तुतवर्तिनां अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्य

२०

नइत्यादौहिप्राचीनानांसमासोक्तिलक्षणानिनसंगच्छेरन्नप्रस्तुतेनश्लिष्टसाधारणादिविशेषणस
मर्पितानुरागपूर्वकवदनचुंबनाद्यप्रस्तुतवृत्तांतसमारोपमात्रस्यचारुताहेतुत्वाभ्युपगमेनविशे
षणसाम्यकृतकामुकाद्यप्रस्तुतधर्मिव्यंजनानपेक्षणादितिचेत् ॥ उच्यतेस्वरूपेणाप्रस्तुतवृत्तां
तस्यारोपोनचारुताहेतुःकिंत्वप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्यतस्यारोपःतथाभू
तस्यैवरसानुगुणत्वात् ॥ नचतावदवगमनेविशेषणपदानांसामर्थ्यमस्तितत्रश्लेषादिमहिम्नावि
च शेषणपदैःस्वरूपतःसमर्पितेनैववदनचुंबनादिनातत्संबंधिनिकामुकादौअभिव्यक्तेपुनस्तदीय अ५ चुंब
रा त्वानुसंधानंतत्रभवतियथास्वरूपतोदृष्टेगजाश्वादिनातत्संबंधिनिराजादौस्मारितेपुनर
श्वादेस्तदीयत्वानुसंधानवदितिविशेषणसाम्येनवाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यापे
क्षा ॥ अतएवाश्लिष्टविशेषणायामिवसाधारणविशेषणायामप्यप्रस्तुतव्यवहारसमारोप
इत्येवप्राचीनानांप्रवादःकंदुकेव्यावल्गत्कुचभारत्वादिविशिष्टवनितासेव्यत्वस्यकामुकसं
य बंधित्वेनैवसमारोपणीयत्वात् ॥ स्वरूपतःकंदुकेऽर्पितस्यसत्त्वेनासमारोपणीयत्वात् ॥ किंचसा सो०
रूप्यनिबंधनत्वेनोदाहृतायांसमासोक्तावप्रस्तुतवृत्तांतस्याशब्दार्थस्याप्रस्तुतवृत्तांतरूपेणैव
गम्यतयातेनरूपेणतस्यसमारोपसिद्धेरन्यत्रापितथैवयुक्तमितियुक्तमेवप्राचीनानांलक्ष २०

णमितिविभावनीयं ॥ अलंकारः परिकरः साभिप्राये विशेषणे ॥ सुधांशुकलितोत्तंसस्तापं हरतु वः र
शिवः ॥ अत्र सुधांशुकलितोत्तंस इति विशेषणं तापहरणसामर्थ्याभिप्रायं ॥ यथा तव प्रसादात्कु
सुमायुधोपि सहायमेकं मधुमेव लब्ध्वा ॥ कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनो
न्ये ॥ अत्र पिनाकपाणेरिति हरविशेषणं कुसुमायुध इत्यर्थाल्लभ्याहमर्थविशेषणं च सारा
सारायुधत्वाभिप्रायगर्भं ॥ यथा वा ॥ सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ॥ शरीरक
स्यापि कृते मूढाः पापानि कुर्वते ॥ अत्र शरीरविशेषणानि तस्य हेयत्वेनासंरक्षणीयत्वाभिप्रा
व्याङ्पूर्व आस उपवेशन इति धातुः यगर्भाणि ॥ यथा वा ॥ व्यासं नैकतया स्थितं श्रुतिगणं जन्मी न वल्मीकतो नाभौ नाभवमच्युत वामलूरुतः
स्य सुमहद्भाष्यं च नाभाषिषं । चित्रार्थां न बृहत्कथामचकथं सुत्राम्णि नासं गुरुर्देव त्वद्गुणवृं
दवर्णनमहं कर्तुं कथं शक्नुयां ॥ अत्र श्रुतिगणं व्यासमित्यादीनि विशेषणानि स्वस्मिन्व्यासा
दिसाधारणकार्यप्रतिषेधमुखेन नाहं व्यास इत्याद्यभिप्रायगर्भाणि तत्राद्योदाहरणयोरेकैकं
विशेषणं समनंतरयोः प्रत्येकं बहूनि विशेषणानि तत्रापि प्रथमोदाहरणे सर्वाण्यपि विशेषणान्ये
कार्थाभिप्रायगर्भाणि पदार्थरूपाणि च द्वितीयोदाहरणे भिन्नाभिप्रायगर्भाणि वाक्यार्थरूपाणि चे
ति भेदः ॥ तेषु व्यंग्यार्थसद्भावेपि न ध्वनिव्यपदेशः ॥ तापहरणसमर्थस्यैकैकमुख्यन्यायेन स

वैधान्विधेये भंजकत्वे शरीररक्षणार्थं पापमाचरतां मृदुत्वे स्वस्य वर्णनीयराजगुणकथनाशक्तत्वे
च वाच्य एवोपस्कारकत्वादत एव व्यंग्यार्थस्य वाच्यपरिकरत्वात्परिकर इति नामास्यालंकारस्य ।।
केचित्तु निष्प्रयोजनविशेषणोपन्यासे पुष्टार्थदोषस्योक्तत्वात्सप्रयोजनत्वं विशेषणस्य दोषा
भावमात्रं न कश्चिदलंकारः ।। एकनिष्ठतादृशानेकविशेषणोपन्यासः परं वैचित्र्यविशेषणा
र त्परिकर इत्यलंकारमध्ये परिगणित इत्याहुः ।। वस्तुतस्तु अनेकविशेषणोपन्यास एव परि
कर इति न नियमः श्लेषयमकादिषु पुष्टार्थत्वदोषाभावेन तत्रैकस्यापि विशेषणस्य साभि
प्रायस्य विन्यासविच्छित्ति विशेषसद्भावात्परिकरत्वोपपत्तेः । यथा वा ।। अनिर्जयैतनिर्जायदिदेवता
मुखाय तस्य व्यवलेजुषतेप्यघं ।। क्षितिभृतैव सदेवतकावयं वनवतानवता किमहिद्रुहा ।। अत्र पुरुहू वृत्रासुरः
रा तपूजोद्युक्षामं दादीन्प्रतिभवतः कृष्णस्य वाक्यं गोवर्धनगिरिरेवास्माकं रक्षकस्तेन देवतामिति
स एव पूजनीयः । नारक्षकः पुरुहूत इत्येवं परं वनवतेति गोवर्धनगिरेर्विशेषणं काननवत्वान्निझ
रादिमत्वाच्च पुष्पफलमूलतृणजलादिभिरारण्यकानामस्माकं अस्मद्गवानां च गवामयमे
व रक्षक इत्यभिप्रायगर्भं ।। एवमत्र एकस्यापि साभिप्रायविशेषणविन्यासस्य विच्छित्तिवि
शेषवशादलंकारत्वसिद्धावन्यत्रापि सुधांशुकलितोत्तंस इत्यादौ तस्यात्मलाभेन विशि

वायेतेअपि च एकपदार्थहेतुकं काव्यलिंगमलंकार इति सर्वसंमतं ॥ तद्वदेकस्यापि विशेषणस्य साभि-
प्रायस्यालंकारत्वं युक्तमेव ॥ साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः ॥ चतुर्णां पुरुषार्थानां दाता देव-
श्चतुर्भुजः ॥ अत्र चतुर्भुज इति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्याभिप्रायगर्भं ॥ यथा वा ॥
फणीन्द्रस्ते गुणान्वक्तुं लिखितुं हैहयाधिपः ॥ द्रष्टुमाखंडलः साक्षात्कोहमेष क ते गुणाः ॥ फ-
णीन्द्र इत्यादिविशेष्यपदानि सहस्रमुखत्वाद्यभिप्रायगर्भाणि ॥ नानार्थसंश्रयः श्लेषो वर्ण्या-
वर्ण्योभयाश्रितः ॥ सर्वदोमाधवः पायात्स योगं गामदीधरत् ॥ अब्जेन त्वन्मुखं तुल्यं हरिणा-
हितसक्तिना ॥ उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ॥ अनेकार्थशब्दविन्यासः श्लेषः ॥
स च त्रिविधः ॥ प्रकृतानेकविषयः अप्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयः ॥ सर्वदेत्यादि-
नात्क्रमेणोदाहरणानि ॥ तत्र सर्वदोमाधव इति स्तोतव्यत्वेन प्रकृतयोर्हरिहरयोः कीर्तनेन प्रकृ-
तश्लेषः ॥ अब्जं कमलमब्जश्चंद्रस्तयोरुपमानमात्रत्वेनाप्रकृतयोः कीर्तनेनेदमप्रकृतश्लेषः ॥ वाहि-
नीपतिः सेनापतिः समुद्रश्च तत्र समितौ शस्त्रप्रपातोत्पतद्रुधिरस्य सेनापतेर्वर्णने प्रकृ-
तमिति प्रकृताप्रकृतश्लेषः ॥ यथा वा ॥ नातः काकोदरो येन द्रोग्धापि करुणात्मना ॥ पूतनामार-
णख्यातः स मेऽस्तु शरणं प्रभुः ॥ नीता नानाकुलीभावं लुब्धैर्भूरिशिलीमुखैः ॥ सदृशे वनवृद्धै-

२२ प्रत्यग्रोभिनवोनव्यइत्यमरः ॥२

नांकमलानांत्वदीक्षणे ॥ असावुदयमारूढः कांतिमान्रक्तमंडलः ॥ राजा हरति लोकस्य हृदयं मृदु
भिः करैः ॥ अत्राद्यस्तोतव्यत्वेनप्रस्तुतयो रामचंद्रयोः श्लेषः ॥ द्वितीये उपमानत्वेनाप्रस्तुत द
योः पद्महरिणयोः श्लेषः तृतीये रात्रिवर्णनप्रस्तावे प्रकृतस्य प्रत्यग्रोदित चंद्रस्याप्रकृतस्य न
वाभिषिक्तनृपतेश्च श्लेषः ॥ यदत्र प्रकृताप्रकृतश्लेषोदाहरणे द्वे शक्तिमूलध्वनिमिच्छंति
प्रांचः ॥ तत्र प्रस्तुताप्रस्तुताभिधानमूलकस्य उपमादेरलंकारस्य व्यंग्यत्वाभिप्रायं न तु प्रकृतार्थ छं
स्यैव व्यंग्यत्वाभिप्रायं अप्रकृतार्थस्यापि शक्त्या प्रतिपाद्यस्याभिधेयत्वावश्यंभावेन व्यंजनानप
क्षत्वात् ॥ यद्यपि प्रकृतार्थे प्रकरणबलान् झटिति बुद्धिस्थिते सत्येव पश्चान् नृपतेः ग्राह्यधना
दिवाचिनां राजकरादिपदानां अन्योन्यसन्निधानबलात् तद्विषयशक्त्यंतरोन्मेषपूर्वकमप्र
ग्य कृतार्थः स्फुरेत् ॥ नैतावतानस्य व्यंग्यत्वं शक्त्या प्रतिपाद्यमाने सर्वथैव व्यंजनानपेक्षणात् ॥ पर्य
वसिते प्रकृतार्थाभिधाने पश्चात् स्फुरति चेत् ॥ कामं तु शब्दश्लेषो भवतु अस्ति चान्यत्रापि श
ब्दश्लेषः ॥ यथा वा ॥ अयमितिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः ॥ सत
तमसुमतामगम्यरूपाः ॥ परिणतिदिक्करिकास्तटीर्बिभर्ति ॥ मंदमग्निमधुरर्यमोपलादर्शि
तश्वयथु चाप्रवत्तमः ॥ दृष्ट्यस्तिमिरजं निषेधिरे दोषमोषधिपतेरसन्निधौ ॥ अत्र हितमा २२

चः

। विलक्षणं पदभंग

रादभंगश्लेषः सर्वे दोमा धर्मांगं गांहारिणा हितसक्ति नेत्यादिषु परस्परं सभंगपक्ष्ययुनाथे को
टीकाराः सभंगश्लेष इति तत्र सभंगः श्लेषः शब्दालंकारः अभंगश्लेषस्त्वर्थालंकारः इति केचि
त् उभयमपि शब्दालंकार इति अन्ये। उभयमपि अर्थालंकार इति स्वाभिप्रायः ए
तद्विवेचनं तु चित्रमीमांसायां द्रष्टव्यं। अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया॥ एकः
कृती शकुंतेषु योन्यं शक्रान्न याचते॥ यत्राप्रस्तुतवृत्तांतवर्णने प्रस्तुतावगति पर्यवसायित
अप्रस्तुतप्रशंसालंकारः। अप्रस्तुतवृत्तांतवर्णनेन प्रस्तुतावगतिश्चाप्रस्तुतप्रस्तुतयोः सं
बंधे सति भवति संबंधश्च सारूप्यं सामान्यविशेषभावः कार्यकारणभावो वा संभवति॥ तत्र
सामान्यविशेषभावे सामान्याद्विशेषस्य विशेषाद्वा सामान्यस्यावगतौ द्वैविध्यं कार्यकारण
भावेपि कार्यात्कारणस्य कारणाद्वा कार्यस्यावगतौ द्वैविध्यं सारूप्ये त्वेकोभेद इत्यस्याः पंच
प्रकाराः यदाहुः। कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति। तदन्यस्य वचः स्तुल्ये तुल्यस्ये
ति च पंचधेति तत्र सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणं॥ एकः कृतीति अत्राप्रस्तुत
स्य चातकस्य प्रशंसा प्रशंसनीयत्वेन प्रस्तुतेन तत्स्वरूपं तु द्रष्टव्या याचनाभिवृत्ते मानिनिप

मूर्खवैधेयबालिशा इत्यमरः॥

र्यवस्यति यथावा॥ आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा। मत्ते
भकुंभतटपाटनलंपटस्य नादं करिष्यति कथं हरिणाधिपस्य। अत्र अनुनकस्यानिंदा निंदनीय
त्वेन प्रस्तुतेन तत्सरूपे कृत्रिमवेषव्यवहारमात्रेणाविदुषामभिनयति वैधेयपर्यवस्यति। यथावा॥
अंतश्छिद्राणि भूयांसि कंटका बहवो बहिः कथं कमलनालस्य माभूवन्भंगुरा गुणाः॥ अ
त्र कमलनालवृत्तांतकीर्तनेन तत्सरूपे बहिः खले भुजायगत सुभानपुत्रादिभिरंतः कलहं कुर्वाणे
पुरुषे पर्यवस्यति। एवं चलक्ष्यलक्षणयोः प्रशंसाशब्दः स्तुतिनिंदासाधारणस्वरूपकीर्त
नमात्रपरो द्रष्टव्यः॥ सामान्यनिबंधना यथा॥ विधाय वैरं सामर्षे नरोरौ य उदासते। निक्षि
प्याग्निं कक्षे शेरते तेभिमारुतं॥ अत्र प्रागेव सामर्षे शिशुपाले रुक्मिणीहरणादिना वैर
हेतौ सजवता हे छन्नत स्मिन्नु दासितुमयुक्तमिति विशेषे वक्तव्ये प्रस्तुते तन्न्यायानार्थं
सामान्यमभिहितं। यथावा॥ सोहा ईस्वणे रेखाणमु आवचक्खिदाउणो। परोक्खमिसिकोप्पसि
परीक्षानिकषोपलः अत्र यदि त्वं प्रत्यक्ष इव परोक्षेपि मम हितमाचरसि तदा त्वमुत्तमसुहृ
दिति विशेषे वक्तव्ये प्रस्तुते सामान्यमभिहितं॥ विशेषनिबंधना॥ यथा। अंकाधिरोपित
मृगश्चंद्रमा मृगलांछनः केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः॥ अत्र दृष्टं प्रतिबलम

द्वावाक्यमादेव दूषणपरं पूर्वप्रस्तावनानुसारेणात्र एव वाच्यातिभामवति न तु मद्दुरितिसा
मान्यवक्तव्ये न सैयापनार्थमप्रस्तुतविशेषोऽभिहितः॥ एवं ब्रह्मकथादिषु सामान्यतः कंचि
दर्थं प्रस्तुत्यपन्न। ह्यावरणार्थं अप्रस्तुतकथाविशेषोदाहरणं द्वियमेवाप्रस्तुतप्रसंसा द्रष्टव्या
कारणनिबंधनायथा॥ हृतसारमिवेंदुमंडलं दमयंतीवदनाय वेधसा। कृतमध्यबिलं विलो
क्यते धृतगंभीरखनीखनीलिम॥ अत्राप्राकरणिकं दुमंडलगतत्वयोऽपेक्षमाणेन दमयं
तीवदननिर्माणार्थं सारांशाहरणेन तत्कार्यरूपोवर्णनीयत्वेनाप्रस्तुतेनो दमयंतीवदनगतलो
कोत्तरसौंदर्यविशेषः प्रतीयते॥ यथावामदीयवरदाराजस्तवे॥ आश्रित्य नूनममृतद्यु
तयः पदं ते देहक्षयोपनतदिव्यपदाभिमुख्याः। लावण्यपुण्यनिचयं सुहृदि त्वदा
स्येविन्यस्ययांति मिहिरं प्रतिमासभिन्नाः॥ अत्राप्राकरणिकचंद्रगतत्वयोऽपेक्ष्यमा
णेन लावण्यपुण्यनिचयविन्यासेन कारणेन तत्कार्यमनंतकोटिचंद्रलावण्य। शालित
मनन्यमुखसाधारणं भगवन्मुखे वर्णनीयत्वेनाप्रस्तुतं प्रतीयते॥ तथाहि। चंद्रस्ताव
न्मंडलिंगा दृष्टिपथाभ्यां भेदाध्यवसायाद् प्रतिमासंभिन्नत्वेन वर्णितः तेनातीता
द्राजनंतकोटयइतिलब्धं कालस्यानादित्वात्॥ सर्वेषां च तेषामाकाशसमाश्रयणोऽल्ले

२८

त्र्य १ भ

साकूतोदाहरणयोः प्राकरणिकेऽर्थे प्रकरणवशात्सद्धितिबुद्धिस्थे विशेषणसाम्यादप्रकृतोऽपि रूढत्वेऽस्याद्द
तां मादिः प्रतीयतेतत्र समासोक्तेरंगश्लेषइतिसर्वेषामभिमतः पक्षः एवमत्राऽपि श्लेषगूढे ध्वनि न्य
बुद्धिर्न कार्या॥ रम्याइति प्रासवतीः पताकारागं धिविक्ता इतिव धयंती॥ यस्यामलिंदेषु नमहूलीकाः असेवतश्च्याता
समंव धूभिर्विलसत्सुवानः॥ अत्र द्वितीयां तादिविशेषणसमर्पितार्थनिराशांशब्दसामर्थ्येनवधू
धूभिरनन्वयः विभक्तिभेदात्॥ चेने विभक्तिभेदे पितदन्वयाक्षेपकं साधर्म्यमिह निबद्धमस्ति
तत एतस्मिन्नधिकपयःश्रियं वहंत्यः संप्राप्य पवनभुवाजवेननीताः वाल्मीकेररहितरामलक्ष्म
णानांसाधर्म्यंदधति गिरां महासरस्याः॥ इत्यत्र वाक्षिसश्लेषोपिवत्। सममियेतक्रियाविशेष
णं सहार्थत्वेनाप्युपपन्नं वधूषु श्लिष्टविशेषणार्थान्वियात् प्रायः द्रागप्रतीतं साम्यार्थेना त्व
लंबते तस्माद्दर्थसौदर्यबलादेवतदन्वयानुसंधानमितिगूढश्लेषः तदनुतद्बलादेवसम
शब्दस्यसाधर्म्यार्थकल्पनं इति वाच्यतेवोपमालंकारस्यतदंगमयं श्लेष इति अलमति
ति प्रपंचेनैनतत्सिद्धः श्लेषत्रैविध्यं एवं च श्लेषः प्रकारांतरेणापि द्विविधः संपन्नः उदा
हरणगतेषु अञ्जनं कीलालवाहिनीत्यादिशब्देषु पदपंगमवपेक्ष्य नानार्थकोऽजीवा

परस्परविलक्षणं १

ष महिम्ना भवच्चरणसमाश्रयणायेनाध्यवसितं भगवच्चरणद्वयं पन्नानां च देहद्वयोपस्थितौ परम
पदप्राप्त्याभिमुख्यं तदानीमेव स्वस्वसुहृद्दुर्गे स्वकीयसुकृतस्तोममनिवेशनं ततः सूर्यमंडलप्रा
प्तिश्चेत्येतत्सर्वं श्रुतिसिद्धमिति तदनुरोधेन तेषां देहद्वयकालस्यामावास्यारूपस्योपस्थि
तौ सूर्यमंडलप्राप्तेः ॰ प्राक् तत्रत्यपक्षसिद्धपुण्यत्वेन निरूपितस्य लावण्यस्य प्रहाणं निमि
त्तीकृत्य तस्य चंद्रसादृश्यस्वरूपापचरितं तत्सौहार्दवाति भगवन्मुखन्यस्तनमुखोक्षितं
यद्यपि सुहृद्धृत्वेनावत्स्वल्पपुण्यसंक्रमणं भवति तथाप्यत्र सुहृदीयेकवचन
हृ न भगवन्मुखमेव चंद्रस्य सुहृद्दूतं नमुखांतराणि चंद्रसादृश्यगंधस्योऽभावादिति स्पष्टानी
भगवन्मुखस्यांतरमुखेभ्यो व्यतिरेकोपि व्यंजितः॥ ततश्चात्रास्मिन्नेव सर्वेषां चंद्राणां स्वस्वयावल्ला
वण्यविन्यसनोत्प्रेक्षणे यथा प्राग्वर्णितः प्रस्तुतोर्थः स्पष्टमेव प्रतीयते यद्यपि श्रुतौ सूर्यमंडलप्राप्त्य
नंतरक्षाविधिरजानघटितक्रमणानंतरमेव सुहृत्सुकृतसंक्रमणं श्रूयते तथापि शारीरक्लेशा क्र
स्त्रितस्यार्थवशात् प्राग्भावस्थापितश्रुतितदनुसारेण विन्यस्याभिहितं योनीत्युक्तं॥ कायेनि
बंधनायथा॥ नाथत्वदंघ्रिनखधावनतोयलग्नास्तत्कांतिलेशकणिकाजलधिं प्रविष्टाः॥ ता
एव तस्य मथनेन घनीभवंतो नूनं समुद्रनवनीत

पदं प्रपन्ना ॥ अत्र भगवत्पादांबुजक्षालनतोयरूपायां दिव्यसरिति अलक्तकरसादिवलग्नानां तयासह
समुद्रं प्रविष्टानां नखकांतिलेशानां कणिकानां परिणामतया संभाव्यमानेन समुद्रनवनीतपदवाच्येन
चंद्रेण कार्येण तन्नखकांत्युत्कर्षः प्रतीयते यथा वा ॥ अस्याश्चेद्गतिसौकुमार्यमधुना हंसस्य ग
र्वैरलं संल्लापो यदि साध्यतां परभृते वाचंयमत्वव्रतं ॥ अंगानामकठोरता यदि दृषत्प्रायैव सा
मालतीकांतिश्चेत्कमला किमत्र बहुना काषायमालंबतां ॥ अत्रापि कामिन्यादिषु वर्णनीयत्वे
न प्रस्तुतेषु हंसादिगतगर्वशांत्यादिरूपाणि औचित्येन संभाव्यमानानि कार्याणि क्रमेणाभि
हितानि एतानि च पूर्वोदाहरणवन्नवस्तुकार्याणि किंतु तत्तन्निरीक्षणकार्याणि ॥ लज्जा तिर
श्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः ॥ तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथि
लं चमर्य इत्याद्युदाहरणांतरे तथैव स्पष्टं अंगानामकठोरतेति तृतीयपादे तु वर्णनीयांगसौकुमा
थी र्यातिशयनिरीक्षणकार्यत्वमपि नो क्षिप्य मालतीकठोरत्वे विवक्षितं प्रतीयते किंत्विशेषापेक्ष कठोरत्व
स्य तदकार्यत्वात् किंतु तद्दृष्टेरेव तथा च न सौकुमार्यनिरीक्षणकार्यैककठोरताज्ञानं इदमपि तद्गमा
दिवदृष्टइत्युदाहरणे तथैव स्पष्टं ॥ अथ स्यकार्यत्वइव बुद्धेः कार्येऽपि कार्यनिबंधनत्वं न ह्यतइ
ति ॥ तादृशान्यपि कार्यनिबंधनाप्रस्तुतप्रशंसायामुदाहृतानि प्राचीनैः ॥ वस्तुतस्तु तदतिरेकेऽपि २५

यत्र प्रस्तुतेन वर्ण्यमानेनाभिमतमन्यत्॥ प्रस्तुतं द्योत्यते तत्र प्रस्तुतांकुरोलंकारः॥ उत्तरार्धमुदाहरणं इह
प्रियतमेन साकमुद्याने विहरंती काचित् भृंगं प्रत्येवाहेति वाच्यार्थस्य प्रस्तुतत्वं॥ न चानामंत्रणीयामंत्र
णेन वाच्यार्थासंभावादप्रस्तुतमेव वाच्यमिह सरूपप्रस्तुतावगतये निर्दिष्टमिति वाच्यं मेघादीनामंत्र
णादावप्यामंत्रणस्य लोके दर्शनात्॥ यथा॥ कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्या
दिव वक्षि साधु विदितं कस्मादिदं कथ्यते॥ वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते न छायापि परो
पकारकरणी मार्गस्थितस्यापि मे॥ इत्यत्र चेतनाचेतनप्रश्नोत्तरवर्णितिर्यगामंत्रणस्यायं न संभा ग
वितत्वाभावात्॥ एवं प्रस्तुतेन वाच्येन भृंगोपालंभरूपेण पत्न्याः कुलवध्वाः सौंदर्याभिमान
शालिन्याः क्रूरजनपरिवृत्तिदुष्प्रापायां परवनितायां विटस्य सर्वस्वापहरणसंकल्पदुरासदायां वेश्या भ
यां कंटकसंकुलकेतकीकल्पायां प्रियतमं प्रत्युपालंभो द्योत्यते॥ यथावा॥ अन्यासु तावदुपमर्द
सहासु भृंग लोलं विनोदय मनः सुमनोलतासु॥ बालामजातरजसं कलिकामकाले व्यर्थं कदर्थ
यसि किं नवमल्लिकायाः॥ अत्राप्युद्यानमध्ये चरंतं भृंगं प्रत्ययमुपालंभ इति वाच्यार्थस्यापि प्रस्तु
तत्वं इदं च प्रौढांगनासु विद्यमानासु बालिकां तरे कूरायति कामिनि श्रृण्वति कस्याश्चिद्विदग्धायाः २६
वचनमिति तं प्रत्युपालंभो द्योत्यते॥ यथावा॥ कोशद्वंद्वमियं दधाति नलिनी कादंबचंचुक्षतं धत्ते

ये

४४ अप्रस्तुतप्रशंसायां वाच्यार्थस्याप्रस्तुतत्वात् अवर्णनीय इति तत्राभिधायामपर्यवसिता यातेन प्रस्तुतार्थव्यक्तिरलंकारः॥४४

चूतलता नवं किसलयं पुंस्कोकिलास्वादितं॥ इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चेलांतेन
तिरोदधे स्तनतटं बिंबाधरं पाणिना॥ अत्र द्वयमिति नलिनीव्यक्तिविशेषनिर्देशेन दीर्घिकायास्तट इत्येने
न वाच्यार्थस्य प्रस्तुतत्वं स्पष्टं प्रस्तुतांतरद्योतनं च स्वयमेव कविना विवृतमुत्तरार्द्धे॥ अत्राद्योदाहरणयोर
प्यपेत्रा ध्वनिमाह लोचनकारः॥ इह तु वाच्यस्य प्रस्तुतत्वेन तत्राभिधायां पर्यवसितायां पदार्थसौंदर्य
बलेनाभिमतार्थव्यक्तिर्ध्वनिरेवेति वस्तुतस्त्वयमप्यलंकार एव न ध्वनिरिति व्यवस्थापितं चित्रमीमांसा एव
यां॥ तृतीयोदाहरणस्य त्वलंकारत्वे कस्यापि न विवादः उक्तं हि ध्वनिकृता॥ शब्दार्थशक्त्याक्षिप्तोपि
व्यंग्योर्थः कविना पुनः॥ यत्राविः क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेरिति एतानि सारूप्यनिबंधना
न्युदाहरणानि संबंधांतरनिबंधनान्यपि कथंचिद् द्वाच्यव्यंग्ययोः प्रस्तुतत्वे भवंत्युदाहरणीयानी
ति दिङ्मात्रमुदाह्रियते॥ रात्रिः शिवा काचन सन्निधत्ते विलोचने जाग्रतमप्रमत्ते समानधर्मा युवयोः सका प्र
शे सख्यं भविष्यत्यचिरेण कश्चित्॥ अत्र शिवसारूप्यामिव तदेकदेशतया तद्वाच्यं भाललोचनमपि शि
वरात्रिमाहात्म्यप्रयुक्तत्वेन वर्णनीयाभिलषितमुखेन हस्तं शिवसारूप्यं गम्यं॥ यथावा॥ वहंती सिंदू
क रं प्रबलकबरीभारतिमिरत्विषां वृंदे बंदीकृतमिव नवीनार्ककिरणं तनोतु क्षेमं नस्तव वदनसौंदर्यल
हरीपरीवाहस्रोतःसरणिरिव सीमंतसरणिः॥ अत्र वर्णनीयत्वेन प्रस्तुतललनायाः सीमंतसरण्या वदन

२७

मोद्येपरीवाहहेतोस्त्रेक्षणेन परिपूर्णेतस्य कवरस्य परिवाहकरणीभूतास्वस्थाने आगतामिव दन्तसौंदर्यसमृद्धिः
प्रतीयते सापि वर्णनीयत्वेन प्रस्तुतैव ॥ यथा वा ॥ अंगास्तंगिमृणालकांडमयते भृंगावलीनां रुचं नासामौक्ति-
कमिंद्रनीलसरणिं श्वासानिलाद्दूरहेत । दत्तेयं हिमवालुकापि कुचयोर्धत्ते क्षणं दीप्ततां प्रायः प्रतितांबुव
तू करतले धारांबुसंलीयते ॥ अत्र नायिकाया विरहासहत्वातिशयप्रकटनाय संतापवर्णनकार्याणि मृणा
लम्लान्यादीन्यपि वर्णनीयत्वेन विवक्षितानीति तन्मुखेन संतापो वगम्यः । यत्र कार्यमुखेन कारणस्यावग
तिस्तत्र प्रतीयमानत्वाभावेन तत्रायमलंकारः ॥ किंत्वनुमानमेव ॥ यथा ॥ परिम्लानं पीनस्तनजघनसंगादुभयतस्
तनोर्मध्यस्यांतः परिमिलनमप्राप्य हरितं । इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशांग्याः
संतापं वदति नलिनीपत्रशयनं ॥ ननु प्रस्तुतकार्याभिधानमुखेन कारणस्य गम्यत्वमपि प्रस्तुतांकु
रविषयत्वात् । किं तर्हि पर्यायोक्तमित्याकांक्षायामाह ॥ पर्यायोक्तं तु गम्यस्य वचो भंग्यंतराश्रयं न मे
स्तस्मेदृतोयेन मुधारा इव धूकुचो ॥ यदेव गम्यं विवक्षितं तस्यैव भंग्यंतरेण विवक्षितरूपादपि चा
रुतरेण केनचिद्रूपांतरेणाभिधानं पर्यायोक्तं । उत्तरार्धमुदाहरणं । अत्र भगवान्वासुदेवः स्वासाधा
रणरूपाभ्यां गम्यो रूपांतरेणाभिहितो ॥ यथा वा ॥ निवृत्ताहं तु समापयंती शिरीषकोशम्रदिमा
भिमानं ॥ पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥ अत्र कियद्दूरं जिगमिषितिगम्य २७
रूपेणागम्या राकुत्र्यवेयर्थ्यकारकहेतरूपांतरेण स एवाभिहितः ॥ यथा वा ॥ लोकं पश्यति यस्यांघ्रिः स यस्यांघ्रिं न पश्यति ॥ ताभ्यामप्यपरिछेद्या
विद्याविश्वं गुरोस्तव ॥ अत्रेतो तमःप्रतं जालिश्च स्वासाधारणा ×२

न दोषः न चाप्रस्तुतप्रशंसायां प्रस्तुताप्रस्तुतयोः पंचविध एव संबंध इति नियंतुं शक्यते संबंधांतरेपि दर्
शनात् ॥ यथा ॥ तापत्रयौषधवरस्य तव स्मितस्य निश्वासमंदमरुता निबुसीकृतस्य ॥ एते कडंगरचया इ
व विप्रकीर्णा जैवातृकस्य किरणा जगति भ्रमंति । अत्राप्रस्तुतानां चंद्रकिरणानां भगवन्मंदस्मितरूपदि
कडंगरचय व्यौषधधान्यविशेषेवोपेक्षणेन भगवन्मंदस्मितस्य नैस्सारताबलारूपः कोप्युत्कर्षः प्रतीयते न च धान्य
कडंगरचययोः कार्यकरणाभावादिसंबंधोस्ति अतः सहोपत्यादिकमपि संबंधांतरमाश्रणीयमेव ए
वमुपमानोपमेययोर्वाक्येस्यतत्र कचित्कल्पितकार्य कार्यकारणभावनिबंधनोप्रस्तुतप्रशंसेदर्शि
ततोन्यत्रापि दृश्यते । यथा । कालिंदि ब्रूहि कुंभोद्भव जलधिरहं नाम गृण्हासि कस्माच्छत्रोर्मे नर्मदाहं त्व
मपि वदसि मे नाम कस्मात्सपत्न्याः । मालिन्यं तर्हि कस्मादनुभवसि मिलित्कज्जलैर्मालवीनां नेत्रांभो
भिः किमासां समजनि कुपितः कुंतलक्षोणिपालः । अत्र किमासां समजनीति मालवीनां नयनोदनस्य
निमित्ते पृष्टे तत्प्रियमरणरूपनिमित्तमनाख्याय कुपितः कुंतलक्षोणिपाल इति तत्कारणमभिहितमि
ति कारणनिबंधना ॥ मालवान्प्रति प्रस्थिते तत्कुंतलेश्वरे पार्किं ते निर्जिता इति पृष्टे तद्धानंतरभाविज
लनिधिनर्मदाप्रवेशोत्तररूपकार्यमभिहितमिति अत्रैव कार्यनिबंधनापि पूर्वस्यां प्रश्नः शब्दः अस्या
मर्थ इति भेदः ॥ प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः ॥ किं भृंग सत्यां मालत्यां केतक्या कंटकेद्धया ।

ष्वाहाद्यधिकृतत्वादिना व्यासादिप्रतिपत्तौ समानवित्तिवेद्यत्वेन व्यासादिविनेयत्वादेरपि तेष्ववगमादिति भावः। साक्षा
देवविनेयत्वाद्याकारेण। वेदाः किमिति न निर्दिष्टा इत्याशंक्याह परं त्विति

एवार्थरूपान्तरेणाभिहिताः॥ यथा॥ देवं वेदे जलधिशरधिं देवतासार्वभौमं व्यासप्रष्ठा भुवनविदिता
यस्य वाहाधिवाहाः॥ भूषापेटी भुवनमधरं पुष्करं पुष्पवाटी शाटीपालाः शतमखमुखाश्चन्दनद्रुर्मनोभूः॥
अत्र यस्य वेदा वाहा भुजंगमा भूषणमित्यादि तं द्रक्ष्यार्थव्यवस्थितो वेदत्वाद्याकारेण गम्या ए त २
व वेदादयो व्यासप्रमुखविनेयत्वाद्याकारेणाभिहिताः॥ परं तु देवतासार्वभौमत्वस्फुटीकरणाय विशे
त्रा षणविशेष्यभावव्यत्यासेन प्रतिपादिताः॥ अलंकारसर्वस्वकृतापि पर्यायोक्तस्य संप्रदायागतमिद
मेव लक्षणमंगीकृतं॥ गम्यस्यापि भंग्यंतरेणाभिधानं पर्यायोक्त~~[illegible]मिदमेव लक्षणं~~
मिति। चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूजनस्य॥ आलिंगनोद्दामविलासवंध्यं रतोत्स
वं चुंबनमात्रशेषं॥ इति प्राचीनैस्तदुदाहरणं त्वन्यथा योजितं॥ राहुवधूगतेन विशिष्टेन रतोत्सवेन रा
त हुशिरश्छेदकारणरूपो गम्य इति॥ एवं गम्यस्यैवाभिधानमिति लक्षणस्यानुपपत्तिमाशंक्याह॥
यद्गम्यं तस्यैवाभिधाने योगः का यदि द्वारेणैवाभिधानं लक्षणे विवक्षितमिति लक्षणं क्लिष्टगत्या यो
जितं लोचनकृतापि पर्यायोक्तं यदन्येन प्रकारेणाभिधीयत इतीदमेव लक्षणमंगीकृत्य तदुदाहरणे
सम्यकू २ चकार्येण राहुरभिहितेन कारणं व्यंग्यं प्रदर्श्यते न लक्षणे लक्ष्यं नाम च क्लिष्टगत्या योजितं॥ वाच्याद
प्रदीभ २ न्येन प्रकारेण गम्यं नोपलक्षितं सर्वं [illegible]धीयते तस्य येन प्रकारेण [illegible]ण व्यंग्येन उपलक्षित त
मुक्तमिति सर्वेयं कुतः किमर्थ इति न विद्मः॥ दर्शितानि हि गम्यस्यैव रूपान्तरेणाभिधाने बहून्युदाहरणा

कुवलया०
॥२९॥

नि॥ चक्राभिघातप्रसभाज्ञयैवेति प्राचीनोदाहरणमपि स्वरूपेणागम्यस्य भगवतो रूपांतरेणाभिधानस
त्वात्पर्यायोक्तमेव॥ यत्तु [illegible] राहुशिरश्छेदावगमेन तत्र प्राग्युक्तरीत्या प्रस्तुतांकुर एव॥ प्रस्तुतेन च राहोः
शिरोमात्रावशेषणेनालिंगनबंध्यत्वापादनरूपेण वाच्येन भगवतो रूपांतरे उपपादितेनोते न भगवतः
स्वरूपेणावगमनं पर्यायोक्तस्य विषयः॥७१॥ पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनं॥ यामि चूतलतां
द्रष्टुं युवाभ्यामास्यतामिह॥७२॥ अत्र नायिकां नायिकेन संगमय्य चूतलतादर्शनव्याजेन निर्गच्छंत्याः
सख्यास्तत्स्वाछंदसंपादनरूपेष्टसाधनं पर्यायोक्तं॥ यथा वा॥ देहि मत्कंदुकं राधे परिधाननिगूहितं॥
इति विस्रंसिपन्नीवीतस्याः कृष्णो मुदेस्तु नः॥१॥ पूर्वत्र परेष्टसाधनमत्र कंदुकैरोधनार्थं नीवीविस्रं सङ्काद
सनव्याजेन स्वेष्टसाधनमिति भेदः॥७३॥ उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः॥ कः स्वधुनि
विवेकस्तेन यत्से पापिनो दिवं॥७४॥ साधु दूति पुनः साधु कर्तव्यं किमतः परं। यन्मदर्थे विलूनासि तेरपि
नखैरपि॥७५॥ निंदया स्तुतस्तुत्या निंदाया वावगमनं व्याजस्तुतिः॥ कः स्वधुनीत्युदाहरणे विवेको नास्ती
ति निंदाव्याजेन गंगा सुकृतिवदेव महापातकादिकृतवतोपि स्वर्गं नयतीति व्याजरूपया निंदया तत्प्रभावा
तिशयः स्तुतिः॥ साधुदूतीत्युदाहरणे मदर्थमहांतं क्लेशमनुभूतवत्यसीति व्याजरूपया स्तुत्या
मदर्थं न गतासि किंतु रंतुमेव गतासीति धिक्कृतिः॥ दूतिकां मदर्थविरुद्धकारिणीमिति निंदावगम्यते॥ ॥शिव॥
यथा वा॥ कस्ते शौर्यमदो योद्धुं त्वय्येकं सप्तिमास्थिते॥ सप्तसप्तिसमारूढा भवंति परिपंथिनः॥ अधंदा ॥२९॥

नववेश्मनि गिरिजयाप्यधरे हंस्या हृतं दैवेत्थं जगतीतले पुरहराभावे समुन्मीलति ॥ गंगा साग
रमंबरं शशिकला नागाधिपः क्ष्मातलं सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां तु भिक्षाटनं ॥ १ ॥ अत्रा
द्योदाहरणे सप्तसप्तिपक्षगतश्लेषमूलनिंदाव्याजेन स्तुतिर्व्यज्यते ॥ द्वितीयोदाहरणे सर्वज्ञः सर्वे
श्वरोसीति राज्ञः स्तुत्या व्याजरूपया मदीयवैदुष्यदारिद्र्यादि सर्वं जानन्नपि बहुप्रदोनेन रक्षितुं श
क्तोपि मह्यं किमपि न ददासीति निंदा व्यज्यते ॥ सर्वमिदं निंदास्तुत्योरेकविषयत्वे उदाहरणं ॥ भिन्नवि
षयत्वे निंदया स्तुत्यभिव्यक्तिर्यथा ॥ कस्त्वं वानर रामनंदुभवने लेखार्थसंवाहको यातः कुत्र पुरागतः स हनु
मान्निर्दग्धलंकापुरः ॥ बद्धो राक्षससूनुनेति कपिभिः संताडितस्तर्जितः स व्रीडात्तपराभवो वनमृगः
कुत्रेति न ज्ञायते ॥ ७० ॥ अत्र हनुमन्निंदया इतरवानरस्तुत्यभिव्यक्तिः ॥ स्तुत्या निंदाभिव्यक्तिर्यथा ॥ य
द्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न च तान्प्रत्याशया धावसि । काले
बालतृणानि खादसि परं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग भवता किं नाम तप्तं तपः । अत्र हरिणस्तुत्या
राजसेवानिर्विण्णस्यात्मनो निंदाभिव्यज्यते ॥ अथ अप्रस्तुतप्रशंसा विशेष इति अलंकारसर्वस्वका
रः । तेन हि सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणं तु वैधर्म्येणापि दृश्यते ॥ यथा ॥ धन्याः खलु
वने वाताः कह्लारस्पर्शशीतलाः । राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः ॥ अत्र वाता धन्या इति
अप्रस्तुतादर्थादहमधन्य इति वैधर्म्येण प्रस्तुतोर्थः प्रतीयत इति व्युत्पादितं ॥ ३ ॥ इयमेवाप्रस्तुतप्र
शंसा न कार्यकारणनिबंधनेति दंडी ॥ यदाह ॥ अप्रस्तुतप्रशंसा स्यादप्रकांडे तु या स्तुतिः ॥ सुखं

दि

कुवल० ॥२९॥

…जीवंति हरिणा वने एष्वपरसेविनः ॥ अर्थैरयत्नसुलभैर्जलदर्भांकुरादिभिः ॥ सेयमप्रस्तुते वात्र मृग-
वृत्तिः प्रशस्यते ॥ राजानुवर्तनक्लेशनिर्विण्णेन मनस्विनेति ॥ वस्तुतस्तत्र व्याजस्तुतिरित्येव युक्तं ॥
स्तुत्या निंदाभिव्यक्तिरित्यप्रस्तुतप्रशंसातो वैचित्र्यविशेषविशेषसद्भावात् ॥ अन्यथाप्रसिद्ध्या व्याजस्तु-
त्युदाहरणेष्वपि अप्रस्तुताभ्यां निंदास्तुतिभ्यां प्रस्तुते स्तुतिनिंदे गम्येते ॥ इत्येतावता व्याजस्तुतिमात्र-
मप्रस्तुतप्रशंसा स्यात् ॥ एवं चानया प्रक्रियया यत्रान्यगतस्तुतिविवक्षयान्यस्तुतिः क्रियते तत्रापि व्याज-
स्तुतिरेव ॥ अन्यस्तुतिव्याजेन तदन्यस्तुतिरित्यर्थानुगमसद्भावात् ॥ यथा वा ॥ शिखरिणि क नु नाम कि-
यच्चिरं किमभिधानमसावकरोत्तपः ॥ तरुणि येन तवाधरपाटलं दशति बिंबफलं शुकशावकः ॥ अत्र शु-
कशावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते ॥ ॥ निंदाया निंदायां व्यक्तिर्व्याजनिंदेति
गीयते ॥ विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः ॥ अत्र हरनिंदया विषमविपाके संसारं प्रवर्तयतो विधेर्निं-
दाव्यक्तिर्व्याजनिंदा ॥ यथा वा ॥ विधिरेव विशेषगर्हणीयः करट त्वं रटकस्तवापराधः ॥ सहकारतरोश्चका-
रयोसौ सहवाससरले न कोकिलेन ॥ अन्यस्तुत्यान्यस्तुत्यभिव्यक्तिरिति पंचमप्रकारव्याजस्तुतिप्रति-
द्वंद्वीभूतेयं व्याजनिंदा ॥ ननु यत्रान्यस्तुत्यान्यस्तुतिरन्यनिंदयान्यनिंदा च प्रतीतेस्तत्र व्याजस्तु-
तिव्याजनिंदालंकारयोरस्तूपगमे स्तुतिनिंदारूपाप्रस्तुतप्रशंसोदाहरणे ष्वप्रस्तुतप्रशंसानव-
काश्या ॥ तेषामपि व्याजस्तुतिव्याजनिंदाभ्यां क्रोडीकारसंभवादिति चेदुच्यते ॥ यत्राप्रस्तुतवृत्तांतात्स्तु-
तिनिंदारूपात्तत्स्वरूपः प्रस्तुतवृत्तांतः प्रतीयते ॥ अंतश्छिद्राणि भूयांसि इत्यादौ तत्र लब्धावकाशा सा ॥शिव॥ ॥२९॥

रूप्यनिबंधना प्रस्तुतप्रशंसा तत्रापि वर्तमानानां निवारयितुं शक्यान्यस्तुत्यान्यस्तुतिरन्यनिं- अ
दया अन्यनिंदेत्येवं व्याजस्तुतिव्याजनिंदे अपि संभवतश्चेत्कामं ते अपि संभवेतां न तस्याः परित्यागः
यद्यपि विधिरेव विशेषगर्हणीय इति श्लोके विधिनिंदया तन्मूले काकनिंदया चाविशेषस्तस्य प्रभोस्तेना-
विद्वत्संमततया स्थापितस्य पूर्वस्य च निंदापि प्रतीयत इति तत्र सारूप्यनिबंधनाप्रस्तुतप्रशंसाप्यस्ति ॥
तथापि सैव व्याजनिंदामूलेति ॥ प्रथमोपस्थिता सापि तन्न दुष्करा ॥ एवं च व्याजनिंदामूलकव्याजनिंदारू-
पयमप्रस्तुतप्रशंसेति चमत्कारातिशयः एवमेव व्याजस्तुतिमूलकव्याजस्तुतिरूपाप्यप्रस्तुतप्रशंसा दृश्य-
ते ॥ यथा वा ॥ लावण्यद्रविणव्ययो न गणितः क्लेशो महानर्जितः स्वच्छंदं चरतो जनस्य हृदये चिंता-
ज्वरो निर्मितः ॥ एषापि स्वगुणानुरूपरमणाभावाद्वराकी हता कोऽर्थश्चेतसि वेधसा विनिहितस्त-
न्वीमिमां तन्वता ॥ अत्राप्रस्तुततया सरूपयोः स्पष्टनिंदाव्याजेनैव शेषार्थचमत्कारातिशयप्रशंसायां पर्य-
वस्यति ॥ अस्य श्लोकस्य वाच्यार्थविषये यद्यपि नात्यंतं सामंजस्यं ॥ न हि विकल्पा वीतरागस्य निव-
र्तयितुं शक्यास्ते रसाननुगुणत्वाद्वीतरागहृदयस्यैवं विविधविषयेषु प्रवृत्तेश्च ॥ नापि रागि-
ण इति युज्यते ॥ तदीयविकल्पेषु व…तिरूपणैरिंगितत्वस्येहेतेरमंगलोपहितस्यैव रसोनु-
चितत्वात् तुल्यरमणाभावादिरस्यात्यंतमनुचितत्वात् ॥ स्वात्मनि तदनुरूपरूपासंभावनायाम-
पि रागित्वेऽपि रूपप्रायतास्यात् ॥ तथापि विवक्षितप्रस्तुतार्थपरतया न किंचिदसामंजस्यं ॥ च

इतन्निंदाव्याजेनवतत्सौंदर्यप्रशंसा प्रशंसनीयत्वेन कविविवक्षितायाः स्वकवितायाः स्पष्टनिंदाव्याजेनतन्निंदाव्याजेन

कुवल०
॥३०॥

अत एव अस्य श्लोकस्याप्रस्तुतप्रशंसापरत्वमुक्तं प्राचीनैः॥ वाच्यासंभवेप्यप्रस्तुतप्रशंसोपपत्तेरिति॥ ७३॥
आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्॥ चंद्रसंदर्शयात्मानमथवास्ति प्रियामुखं॥ अत्र माध्यिते स्य चंद्र
[illegible] स्य प्रियामुखसत्वे [illegible] विचार्य॥ अथ वक्ष्यादिस्थितः प्रतिषेधआक्षेपः॥ यथा वा॥ सा
हित्यपाथोनिधिमंथनोत्थं कर्णामृतं रक्षत हे कवींद्राः॥ यत्तस्य दैत्या इव लुंठनाय काव्यार्थचोराः प्रगुणी
भवंति॥ गृहंतु सर्वे यदि वा यथेच्छं नास्ति क्षतिः कापि कवीश्वराणां॥ रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि र
त्नाकर एव सिंधुः॥ अत्र प्रथमश्लोकेन प्रार्थितस्य काव्यार्थचोराद्रक्षणस्य स्वोल्लिखितवैक्ष्या
णां समुद्गलद्रत्नजालवदक्षयत्वंविवक्षयप्रतिषेधआक्षेपः॥७४॥ निषेधाभाससमाक्षेपं बुधाः के
चन मन्वते॥ नाहं दूती तनोस्तापस्तस्याः कालानलोपमः॥ केचिदलंकारसर्वस्वकारादयस्त्वेवमाहुः॥
न निषेधमात्रमाक्षेपः॥ किंतु यो निषेधो बाधितः सन्नर्थांतरपर्यवसितः कंचिद्विशेषमाक्षिपति
स निषेधाभासरूपः॥ नाहं दूतीति निषेधो बाधितत्वा[न्नि]भासरूपः संघटनकालोचितकैतव
सआक्षेपः॥ यथा दूत्युक्तौ नाहं दूतीति निषेधो ... इदानीमेवागत्य नापि कोजीवनीयेति विशेषमाक्षिपति॥ रा
वचनपरिहारेण यथार्थवादित्वपर्यवसानं इदानीमेवागत्य नापि कोजीवनीयेति विशेषमाक्षिपति॥
वचनपरिहारेण यथार्थवादित्वपर्यवस्यन्निदानीमेव... जगत्कुटुंबिनस्तेयनराजुः कश्चिदि[illegible]तेः॥ अत्र संदेशा प्य ४
र्थोयेवा॥ नरेंद्रमौलेन वयं तवसंदेशहारिणः॥ इति निषेधोनुपपन्नः संधिकालोचितकैतववचनपरिहारेण यथा
हारिणामुक्तो न संदेशहारिणा इति निषेधो नुपपन्नः ... कश्चिदपि शत्रुभावेनावलोकनीयः॥ किंतु सर्वराजान ॥शिव॥
र्थवादित्वे पर्यवस्य त्सर्वजगतीपालकस्य तव न कश्चिदपि शत्रुभावेनावलोकनीयः॥ किंतु सर्वराजा ॥३०॥
नोभृत्यभावेन सं[र]क्षणीया इति विशेषमाक्षिपति॥ ७५॥ आक्षेपान्योविधो

अंगदप्रतिकस्य विद्वान्समस्य प्रश्नः ५

न वैवेरिणा गिरिजया प्यर्धं शरीरं हृतस्य हृतं देवैश्च जगतीतले पुरहराभावे समुन्मीलति॥ गंगा सागा
रमंबरं शशिकला नागाधिपः क्ष्मातलं सर्वेशत्वमधीश्वरत्वमगमत्वां मा च भिक्षाटनं॥ ७६॥ अत्रा
द्योदाहरणे ससपत्निपक्षगतश्लेषमूलनिंदाव्याजेन स्तुतिर्व्यज्यते॥ द्वितीयोदाहरणे सर्वसर्वे
श्वरासीति ... व्याजरूपया मदीय वैदुष्यदारिद्र्यादि ... दिग्विजयप्रदानेन रक्षितुं रा
ज्ञोपि मसा किमपि न ददासीति निंदा व्यज्यते॥ सर्वमिदं निंदास्तुत्योरेकविषयत्वे उदाहरणं॥ भिन्नवि न
षयत्वे निंदया स्तुत्यभिव्यक्तिर्यथा॥ कस्त्वं वानर राममंदिरवने लेखार्थसंवाहको यातः कुत्रपुरागतः सहनु
मान्निर्दग्धलंकापुरः॥ बद्धो राक्षससूनुनेति कपिभिः संताडितस्तर्जितः स व्रीडान्तपराभवो वनमृगः
कुत्रेति न ज्ञायते॥ ८॥ अत्र हनुमन्निंदया इतरवानरस्तुत्यभिव्यक्तिः॥ स्तुत्या निंदाभिव्यक्तिर्यथा॥ य कु
दृष्ट्वैषि न च तात्पर्यत्याशयाधावसि॥ काले
दृक्कं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा नैवाग्रे... किं नाम तत्संतपः॥ अत्र हरिणस्तुत्या
बालत्वानिरकादसिप रंनिद्रासिनिद्रागमेत मेब्रूहि कुरंग भवता किं नाम तत्संतपः॥ अत्र हरिणस्तुत्या
राजसेवानिर्विण्णस्यात्मनो निंदाभिव्यज्यते॥ अयमप्रस्तुतप्रशंसाविशेष इति अलंकारसर्वस्वका नं
राः॥ तेन हिंसारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणांतरं वैधर्म्येणापि दृश्यते॥ यथा॥ धन्याः खलु
वने वाताः कल्हारस्पर्शशीतलाः॥ राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः॥ अत्र वाता धन्या इति
अप्रस्तुताद्वर्थादिहमधन्य इति वैधर्म्येण प्रस्तुतोर्थः प्रतीयत इति व्युत्पादितं॥ इयमेवाप्रस्तुतप्र
शंसा न कार्यकारणादिनिबंधनेति दिं॥ उदाहरणे अप्रस्तुतप्रशंसा स्यादप्रकांडे तु या स्तुतिः॥ सुखं

दि

कुवलया०
॥३२॥

मन्मथः॥ अत्र जगज्जये साध्ये हेतूनामस्त्राणाम् असमग्रत्वं तीक्ष्णत्वादिगुणवैकल्यं॥ यथा वा॥ उद्या-
नमारुतोद्धूताश्चूतचंपकरेणवः॥ उदश्रयंति पांथानामस्पृशंतो ऽपि लोचने॥ ४१॥ अत्र बाष्पोद्गमनहेतू-
नां रेणूनामसमग्रत्वं स्पर्शनक्रियावैकल्यं॥ इमां विशेषोक्तिरिति दंडी व्याजहार॥ यत्तु प्रथमोदाह-
रणे मन्मथस्य महिमातिशयरूपो द्वितीयोदाहरणे चंपकरेणूनामुद्दीपकतातिशयरूपश्च विशेषः ख्या-
पित इति॥ अस्माभिस्तु तीक्ष्णत्वादिवैकल्यमपि कारणविशेषाभावरूपमिति विभावना प्रदर्शिता॥
३९॥ कार्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबंधके॥ नरेंद्रानेव ते राजन्दशत्यसिभुजंगमः॥ ४०॥ अत्र
नरेंद्रविषवैद्याः सर्पदंशप्रतिबंधकमंत्रौषधिशालिनः श्लेषेण गृहीता इति सत्येव प्रतिबंधके कार्यो-
त्पत्तिः॥ यथा वा॥ विचित्रं तपति राजेंद्र प्रतापतपनस्तव॥ अनातपत्रमुत्सृज्य सातपत्रं द्विषद्गणं॥ १४०॥
अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना॥ शंखाद्वीणानिनादोयमुदेति महदद्भुतं॥ ४०॥ शंखस्त्वेन
कामिनीकंठः स तंत्रीनिनादत्वेन न तद्वीणावाद्यजननी यद्वस्य कारणात्कार्यजन्म॥ ४१॥ विरुद्धात्कार्यसंपत्ति-
र्दृष्टा काचिद्विभावना॥ शीतांशुकिरणास्तन्वीं हंत संतापयंति तां॥ ४२॥ अत्र तापनिवर्तकतया तापवि-
रुद्धैरिंदुकिरणैस्तापजननिरुक्ता॥ यथा वा॥ उदिते कुमारसूर्ये कुवलयमुल्लसति भाति नक्षत्रं॥ मुकु-
लीभवेन्निचित्रं परराजकुमारपाणिपद्मानि॥ १॥ यथा वा॥ अविवेकि कुचद्वंद्वं हंतु नाम जगत्त्रयं॥ ॥शिव॥
श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणं॥ १॥ एवमुदाहरणयोः कारणस्य कार्यविरोधित्वं स्वाभावि-
कं॥ इह तु श्रुतिप्रणयित्वरूपागंतुकगुणप्रयुक्तमिति भेदः॥ ४२॥ कार्यात्कारणजन्मापि दृष्टा काचि- ॥३२॥

अत्र

द्विभावना॥ यशः पयोराशिरभूत्करकल्पतरोस्तव॥ ४३॥ यथा वा॥ जाता लता हि शैले जातु लता-
यां न जायते शैलः॥ संप्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातं॥ १४३॥ कार्याजनिर्विशेषो-
क्तिः सति पुष्कलकारणे॥ हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि॥ ४४॥ यथा वा॥ अनुराग-
वती संध्या दिवसस्तत्पुरःसरः॥ अहो दैवगतिश्चित्रा तथापि न समागमः॥ ४४॥ असंभवोर्थनिष्प-
त्तेरसंभाव्यत्ववर्णनं॥ को वेद गोपशिशुकः शैलमुत्पाटयेदिति॥ ४५॥ यथा वा॥ अ-
यं वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः॥ क एवं जा-
नीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः॥ १॥ विरुद्धं भिन्नदेश-
त्वं कार्यहेत्वोरसंगतिः॥ विषं जलधरैः पीतं मूर्छिताः पथिकांगनाः॥ ४६॥ ययोः कार्यहेत्वोर्भिन्नदेश-
त्वं विरुद्धं तयोस्तन्निबध्यमानमसंगत्यलंकारः॥ यथात्र विषपानमूर्छयोर्भिन्नदेशत्वं॥ यथा वा॥
अहो खलु भुजंगस्य विचित्रोयं वधक्रमः॥ अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते॥ १॥ कुत्रचिदसं-
गतिसमाधाननिबंधनेन चारुतातिशयः॥ यथा वा॥ अजस्रमारोहसि दूरदीर्घां संकल्पसोपान-
ततिं तदीयां॥ श्वासान्स वर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयतामवाप्य॥ विरुद्धमिति विशेषणाद्य-
त्र कार्यहेत्वोर्भिन्नदेशत्वं न विरुद्धं तत्र नासंगतिः॥ यथा वा॥ भ्रूचापवल्लीं सुमुखी यावन्नयति वक्र-
तां॥ तावत्कटाक्षविशिखैर्भिद्यते हृदयं मम॥ ४६॥ अन्यत्र करणीयस्य ततोन्यत्र कृतिश्च सा॥ अन्य-
त्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा॥ ४७॥ अपारिजातां वसुधां चिकीर्षन् द्यां तथाकृथाः॥ गोत्रोद्धा-

कुवलया०
॥३२॥

रप्ररूतो हि गोत्रोद्धे दं पुरा करोः ॥४८॥ अत्र कृष्णं प्रति राजकस्य सोपालंभवचने भुवि विचिकीर्षितं तया तत्र
करणीयं अपारिजातत्वं द्विविधं रूतमिसेकासंगतिः ॥ पुरा गोत्राया उद्धारप्रवृत्तेन वराहरूपिणा न हि
रूधं गोत्राणां दलनं खुरकुट्टनैः कृतमिति ॥ द्वितीया द्विविधापि श्लेषोत्थापिता ॥ यथा वा ॥ त्वत्खड्गखं
डितसपत्नविलासिनीनां भूषा भवंत्यभिनवा भुवने कवीर ॥ नेत्रेषु कंकणमथो रुधुपत्रवल्ली चोलें
दुसिंहतिलकं करपल्लवेषु ॥ १ ॥ मोहं जगत्त्रयभुवामपनेतुमेतदादाय रूपमखिलेश्वर देहभाजां नि
सीमकांतिरसनीरधिना मुनैव मोहं प्रवर्धयसि मुग्धविलासिनीनां ॥ २ ॥ अत्राद्योदाहरणे कंकणादी
भावनास्तुपा नामन्यत्र कर्तव्यत्वं प्रसिद्धमिति नोपन्यस्तं भवति तेषां न्यत्र कृतिराक्षिप्यत इति लक्षणानुगतिः ॥
॥४७॥ विषमं वर्ण्यते यत्र घटनाननुरूपयोः ॥ क्वेयं शिरीषमृद्वंगी क्व तावन्मदनज्वरः ॥४८॥ अत्राति
मृदुत्वेनातिदुःसहत्वेन चाननुरूपयोरंगनामदनज्वरयोर्घटना ॥ यथा वा ॥ अभिलषसि यदींदो
वक्त्रलक्ष्मीं मृगाक्ष्याः पुनरपि सकृदब्धौ मज्जसंक्षालयांकं ॥ सुविमलमथ बिंबं पारिजातप्रसूनैः सु
रभय वदनो वेत्तुं कुतः स्यामुखं कुं ॥ १ ॥ पूर्वत्र वस्तुसती घटना ॥ अत्र त्विंदुवदनलक्ष्म्योस्तर्कितघट
नेति भेदः ॥ विरूपकार्यस्योत्पत्तिरपरं विषमं मतं ॥ कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका ॥ ४९ ॥
ए३ अत्र कारणगुणप्रक्रमेण विरुद्धा श्यामाद्धवलोत्पत्तिः ॥ कार्यकारणयोर्निवृत्त्यनिवृत्तकत्वे पंचमी
विभावना विलक्षणगुणशालित्वे त्वयं विशेषः इति भेदः ॥ ४९ ॥ अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थ ॥ शिव ॥
समुद्यमात् ॥ भक्ष्याशयाहिमंजूषां दृष्ट्वाखुस्तेन भक्षितः ॥ ५० ॥ इष्टार्थमुद्दिश्य किंचित्कमारभ्यत ॥३२॥

व्यक्तो निषेधे चातिरोहिते ॥ गच्छ गच्छसि चेत्कांत तत्रैव स्यान्जनिर्मम ॥ अत्र गच्छेति विधिर्व्यक्तो मा गा इति
निषेधस्तिरोहितः कांतोद्देश्यदेशे निजजन्मप्रार्थनया स्वमरणसंसूचनेन गमभङ्गरूतः ॥ यथा वा ॥ न
चिरं मम तापाय तव यात्रा भविष्यति ॥ यदि यास्यसि यातव्यमलमाशंकयापि ते ॥ १ ॥ अत्रापि न चि
रं मम तापायेति स्वमरणसंसूचनेन गमननिषेधो गर्भरूतः ॥ ३८ ॥ आभासत्वे विरोधस्य विरो
धाभास इष्यते ॥ विनापि तन्वि हारेण वक्षोजौ तव हारिणौ ॥ अत्र हाररहितावपि हारिणौ इ
त्याविति श्लेषमूलको विरोधाभासः ॥ यथा वा ॥ प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेतृ
ता ज्झिता ॥ अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत ॥ अत्र विरोधस
माधानोप्रेक्षाशिरस्को विरोधाभास इति पूर्वस्माद्भेदः ॥ ३७ ॥ विभावना विनापि स्यात्कारणं कार्यज
न्म चेत् ॥ अप्यलाक्षारसासिक्तं रक्तं तव्चरणद्वयं ॥ अत्र लाक्षारसासेककारणाभावेपि रक्तिमा कथि
तः ॥ स्वाभाविकत्वेन विरोधपरिहारः ॥ यथा वा ॥ अपीतक्षीबकादंबमसंमृष्टामलांबरं ॥ अप्रसादि
तसूक्ष्मांबु जगदासीन्मनोहरं ॥ अत्र पानादिप्रसिद्धहेत्वभावेपि क्षीबत्वादि विभाव्यमानं श
रत्समयहेतुकत्वेन विरोधपरिहारः ॥ यथा वा ॥ वरतनुकबरीविधायिना सुरभिनखेन नरेंद्रपाणि
ना ॥ अपचितकुसुमापि वल्लरी समजनि वृंतविलीनषट्पदा ॥ अत्र वल्लर्यां पुष्पाभावेपि पिंगलिंगनं नि
बद्धं तत्र वरतनुकबरीसंक्रांतसौरभ्यं नरपतिनखसंसर्गरूपहेत्वंतरं विशेषणमुखेन दर्शितमिति
विरोधपरिहारः ॥ ३८ ॥ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता ॥ अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति यो १

२ वृक्षादीनां फलं सस्यं वृंतं प्रसवबंधनमित्यमरः । प्रसवस्तु फलपुष्पे रागिर्भः

कुवलय. ॥३३॥ पिप्रसक्तः॥ तथापि भगवत्कराम्बुजसंस्पर्शमहिम्ना सा न जातेति नैलधारणरूपेष्टानवाप्तिमात्रं॥ यथा
वा॥ लोके कलंकमपहातुमयं मृगोंको जातो मुखे तव पुनस्तिलकच्छलेन॥ तत्रापि कल्पयसि न त्विकलं
करेखां नायः समाश्रितजनं हि कलंकयंति॥ अत्रानिष्टपरिहाररूपेष्टानवाप्तिः॥ यथा वा॥ त्रापोप्यदु
ष्टतन्यानन पयस्य शोभे सानुग्रहो भगवता मयि पातितोयं॥ कृष्णाद्दहत्यपि खलु क्षितिनिम्नपिंधने धौ
बीजप्ररोहजननीं दहनः करोति॥ अत्र परानिष्टप्रापणरूपेष्टानवाप्तिः॥ स्वतोनिष्टस्यापि मुनिशाप
पस्य महोपुरुषार्थपुत्रलाभावस्थं भाविगर्भतया दशरथेनेष्टत्वेन [illegible] स्वीकृतत्वात्॥
यत्र केनचित्स्वेष्टसिद्ध्यर्थं निकटे नाम्नेन निपोकुरिष्टमुपेक्ष्य स्वस्यैवेष्टं साध्यते॥ तत्रापीष्टानवा
प्तिरूपमेव विषमं॥ यथा॥ यं प्रति प्रेषिता दूती तस्मिन्नेव लयं गता॥ सख्यः पश्यत मोहं मे विपाकं छ्य
वा विधेरमुं॥ तस्मिन्नेव लयं गतेति नायिके दूत्याः स्वात्मनं दर्शितं॥ यथा वा॥ नपुंसकमिति ज्ञात्वा तां
प्रति प्रेषितं [illegible] मनः॥ तत्तु तत्र रमते हतो पाणिनिना वयं॥ २॥ एतानि सर्वविषमानवासरूदाहर
णानि॥ किं [illegible] विदिष्टा वापि पूर्वेकतदनवाप्तिर्यथा॥ मदीयवरदराजस्तवे॥ भानुर्निरासु भवदंघ्रिम
यूखवर्गभालेभाम्बुताप्यधिकरणोकरमाप्रभातं॥ तत्रो [illegible] द्धतेहुतवहाक्षरणलुसरागेतापं भजत्यनु
कांति दिनं सहिमंदतापः॥ यथा वा॥ त्वदेक [illegible] मयमंबुजकोशमुद्राभंगात्तत्स्फुषममित्रकराप
कृष्या॥ लेख्वापिपर्वणि विधुः क्रमहीयमानः शंसत्यनीसुपवितां श्रियमाशुनाशं॥ अत्रापि लो ॥द्विवा॥
के सूर्यकिरणानां रात्रिषु वह्नौ प्रवेशनमागमसिद्धं॥ सूर्यस्य निजकिरणेषु भगवच्चरणरूपिमप्रे ॥३३॥

प्रस्यात्सत्कृतं तेषामग्नौ प्रतापनं परिकल्प्य तेषामुदयकालदृश्यमरुणिमानं तन्मोक्षतनारावानपिवाग्नि
संतापनप्रयुक्तारुणिमानुवृत्तिं परिकल्प्य सूर्यस्य महतापि प्रयत्नेन तात्कालिकेष्टावाप्तिरेव जायते
न सा वैकालिकेष्टावाप्तिरिति दर्शितं॥ द्वितीये चंद्रस्य भगवन्मुखलक्ष्मीलिप्समानस्य सुहृत्त्वेन
मित्रशब्दश्लेषबलेन सूर्यपरिकल्पितकिरणस्य कमलमुकुलविका[illegible]सकस्य चंद्रानुप्रवेशनं
च सकृत्स्याणे भगवन्मुखलक्ष्मीनिधानकोशगृहमुद्रामोचनपूर्वकं ततो गृहीतभगवन्मुखलक्ष्मीक
कस्यतु यामभगवन्मुखलक्ष्म्याश्चंद्रप्रसाधनार्थं चेद्रसंस्पर्शरूपं परिकल्प्य[illegible]ते॥ एतावतापि प्रयत्ने च
न पोषणमास्यामेव भगवन्मुखसाम्यरूपेष्टप्राप्तिर्जायते॥ न सा वैकालिकीति दर्शितं॥ कृष्टदिष्टान
वाप्तावपि तदवाप्तिभ्रमनिबंधनविच्छित्तिविशेषः॥ यथा वा॥ वल्लीलक्ष्मीपिपासित दहितनगरसंचरं
तीः किरातीरत्नान्यादाय कीर्णान्यरुणतरखदिरांगारशंकाकुलांगी॥ क्षिप्त्वा श्रीखंडखंडं तदुपरि कुमुलीभू
तनेत्राधमेतीत्वंशामोदप्रसक्तेमधुकरपटलेधूममत्रांकं करोति॥ अत्र प्रभूतानि संपादनोद्योगात
त्संपादनालाभोपि तद्भ्रमोपन्यासमुखेन निबद्धः॥ ५०॥ समं स्यादूर्णनं यत्र द्वयोरप्यनुरूप
योः॥ स्वानुरूपं कृतं सद्म हारेण कुचमंडलं॥ ५१॥ प्रथमविषमप्रतिद्वंद्वीदं समं॥ कौमुदी वलु हृन्नोड
रुमंडलं जाह्नवीव राशिखंडमंडनं॥ परस्य कीर्तिरनुरूपमाश्रिता त्वं विभासि नरसिंह भूपते॥ ३ ॥ चि यथावा॥
त्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितघटनासंविधाता विधाता॥ यन्निंबानां परिण
तफलस्फीतिरास्वादनीया यच्चैतस्याः कवलनकलाकोविदः काककोकः॥ २॥ पूर्वसूक्तिपर्यवसायी

कुवलं० ११३४॥

पैतंदौवारिकैर्वार्यमाणं प्रतिनमेववनमुदाहरणं॥ न च अत्र निवारणानिष्ट॥४८

दृनिराप्यर्यवसायीति भेदः॥५१॥ सारूप्यमपि कार्यस्य कारणेन [illegible] समं विदुः॥ नीचप्रवणता लक्ष्मि
जलजायास्तवोचिता॥५२॥ इदं द्वितीयविषमप्रतिद्वन्द्विसमं॥ यथा वा॥ दवदहनादुत्पन्नो धूमो घनता
मवाप्य वर्षैस्तं॥ प्रशमयति तत्युक्तं सोपि [illegible] वृमे वन्हिं दहति॥ यथा वा॥ आरोहालाहलहुतभुजादत्त
हस्तावलंबे बाल्ये शंभोर्निगिल महसा वक्षसे त्रीनिरुद्धः॥ प्रौढो राहोरपि मुखविवरेऽलं तरंगीकृते
यः सोयं वंदुस्तपतिकिरणैर्मामिति प्राप्तमेतत्॥ पूर्वत्र कारणस्वभावानुरूप्ये कार्यस्य अत्र गुणकृत
दोषदुष्टसंसर्गानुरूप्यमिति भेदः॥५२॥ विनानिष्टं च तत्सिद्धिर्यदर्थं कर्तुमुद्यतः॥ फक्कोवा [illegible] णलाभोय
यातेवारणार्थिनिः॥५३॥ इदं समम अनिष्टस्याप्यवाप्तिरित्यर्थसंगृहीतस्य त्रिविधस्यापि विषमस्य प्रतिद्वन्द्विष्टावा
तेरनिष्टस्याप्रसंगोत्र॥ अत्र गजार्थितया राजानमुपसर्पता मापन्नमित्यनुदाहरणं लंघोकनीयं॥ राजद्वारिक्षणं नि
वारणं संभावितमिति तदंगीकृत्य प्रवृत्तस्य विषमालंकारोदाहरणे विवातर्कितोत्कटानिष्टापत्यभावात्॥ किंच यत्र
ताकृतोत्कटानिष्टसत्वेपि [illegible] इष्टार्थत्वप्रतिपत्तिः॥ तत्रापि समालंकारो प्रतिहत एव॥ यथा वा॥ उ
द्वेगजैरटनमर्थयमानएव त्वामाश्रयन्निरुवितदूषितोस्मि राजन्॥ उच्चाटनं त्वमपि लंभयसे तथेन
मामद्यनेववि[illegible]लाम हतां रिसेवा॥ ॥ अत्र यद्यपि व्याजस्तुत्या निंदाभिव्यक्तिविवक्षायां
विषमालंकारः॥ तथापि प्राथमिकस्तुतिरूपवाच्यविवक्षायां समालंकारो न निवार्यते॥ एवं यत्रइ
ष्टार्थागोपिसत्वेपि [illegible] सवरादसतो निष्टार्थस्यप्राप्तिः तत्रापि समालंकारस्य न क्षतिः॥ यथा ॥त्रिवृ॥
राज्ञो न खलु कर्तव्यमिति पित्रा नियोजितः॥ तदेव राज्यं कृतवान्मिनुराज्ञानालंध्वता॥ २॥ अत्रपि १२४॥

एवा तस्ततो न केवलमनिष्टस्यानवाप्तिः॥ किंतु लब्धानिष्टस्यापि प्रतिलंभश्चेत्तदपि विषमं॥ यथा भक्ष्य
प्रेप्सया सर्पपेटिकां दृष्ट्वा प्रविष्टस्य मूषकस्य न केवलं भक्ष्यालाभः॥ किंतु स्वरूपहानिरपीति॥ य
ल था वा॥ गोपानैः दृतिरुस्ततुं प्रचुरक्षीर [illegible] वांछया श्रितो मातस्तन क्षीरमप्यभवत्ं पूत्वया कृतं॥
शुक्रमथो वाप्तिरूपेष्टार्थसमुद्यमादिष्टानवाप्तावनिष्टप्रतिलंभे चोदाहरणं॥ अनर्थपरिहार
रूपेष्टार्थसमुद्यमात्तदुभयं यथा॥ दिग्विश्रितवतश्चंद्रसैंहिकेयभयात् दुर्वारा राज्यपरस्पतंते [illegible]मि
साश्रयस्य ततो भयं॥२॥ अत्र न केवलं त्राणस्यस्यानर्थपरिहारानवाप्तिः॥ किंतु स्वाश्रयस्याप्यन
र्थवाप्तिरिति दर्शितं॥ परानिष्टप्रापणरूपेष्टार्थसमुद्यमात्तदुभयं यथा॥ दिधक्षन्मारुतेर्वालं तमा
दीप्य दशाननः॥ आसीयस्य पुरस्यैव सद्यो दहनमन्वभूत्॥ ॥ पुरस्यैवोत्पैक्षकारेण परानिष्टप्रा
थवा पणाभावो दर्शितः॥ अनिष्टस्यापि तिश्चेतिश्लोके निष्टा[illegible]रपित्रादसंगृहीता या इष्टानवाप्तेश्च प्रत्येक तं
मेव विषमपदेनान्वयः॥ तत्र च केवलानिष्टप्रतिलंभः केवलेष्टानवाप्तिश्चेत्यन्यदपि विषमद्वयं लक्षि
तं भवति॥ तत्र केवलानिष्टप्रतिलंभो यथा॥ पश्चात्पत्ररसिके सरसीरुहस्य किं बीजमर्पयितुमिच्छ
सि वापिकायां॥ कालः कलिर्जगदिदं न कृतज्ञमेते स्थित्वा हरिष्यति मुखस्य तवैव लक्ष्मीं॥ अत्र पद्मात
पत्रलिप्सया पद्मबीजावापं कृतवत्यास्तल्लाभो स्त्येव॥ किंतु मुखशोभाहरणरूपोत्कटानिष्टप्रतिलं
भः॥ केवलेष्टानवाप्तिर्यथा॥ खिन्नोसि मुंच शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः॥ भ
रभुग्नविततबाहुषु गोपेषु हसन्हरिर्जयति॥ अत्र यद्यपि शैलस्यापरिपतनरूपानिष्टावाप्तिर

यि

कुवलया० धिकरणत्वेनाधिकत्वं प्रकल्प्यैव प्रशंसा क्रियत इति तत्प्रशंसा प्रस्तुतगुणयशोराशिप्रशंसायामेव
॥३५॥ पर्यवस्यति॥५५॥ अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता। मणिमालोर्मिका तेद्य करे जपवटीय
ते॥५६॥ अत्र मणिमालामयोर्मिकाया वरांगुलिमात्रपरिमितत्वात्सूक्ष्मा सापि विरहिण्याः क
रे कंकणवत्प्रवेशिता तस्मिञ्जपमालावलयवत् इत्युक्त्या ततोपि करस्य विरहकार्श्यातिशयो
क्ष्म्यं दर्शितं॥ यथा वा॥ यन्मध्यदेशादपि ते सूक्ष्मं लोलाक्षि दृश्यते। मृणालसूत्रमपि ते न संस
मातिस्तनांतरे॥१॥ अन्योन्यं नाम यत्र स्यादुपकारः परस्परं। त्रियामा शशिना भाति शशी भा
ति त्रियामया॥५७॥ यथा वा॥ यथोर्ध्वाक्षः पिबत्यंबु पथिको विरलांगुलिः। तथा प्रपापालिका
पि धारां वितनुते तनुं॥१॥ अत्र प्रपापालिकायाः पथिकेन स्वासक्त्या पानीयदानव्याजेन बहुकालं
स्वमुखावलोकनमभिलषंत्याः विरलांगुलिकरणतश्चिरं पानीयपानानुवृत्तिसंपादनेनोपकारः
पा कृतस्तथा प्रपापालिकयापि पानीयपानव्याजेन चिरं स्वमुखावलोकनमभिलषतः पथिकस्य धारा कांजलि
तनूकरणतश्चिरं पानीयदानानुवृत्तिसंपादनेनोपकारः कृतः॥ अत्रोभयोरप्यपारभ्यांतस्त्वमोप
कारसद्भावेपि परस्परैः रसस्योपकारोपि निबध्यते॥५७॥ विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं।
गतेपि सूर्ये दीपस्थास्तमश्छिंदंति तत्कराः॥५८॥ यथा वा॥ कमलमनंभसि कमले कुवलये तानि ॥शिव॥
च कनकलतिकायां। सा च सुकुमारसुभगेत्युत्पातपरंपरा केयं॥१॥ अत्राद्ये सरसस्य प्रसिद्धाधार
स्याभावेपि कमलकुवलययोरन्यत्रावस्थितिरुक्ता। क्वचिदसिद्धाधाररहितानामाधारांतराणि ॥३५५
तलराणामन्यत्रैवस्थितिरुक्ता। द्वितीये सलिलस्य प्रसिद्धाधारस्याभावेपि

दिग्भागं विनैवाप्रलयमवस्थिते वर्णिते दृश्यते॥ यथा॥ दिवमप्युपयातानामाकल्पमनल्पगुणगणा ये
षां। रमयंति जगंति गिरः कथमिव कवयो न ते वंद्याः॥१॥ अत्र कवीनामभावेपि तद्गिरामाधारां
तरमिदंग्भागं विनैवाप्रलयमवस्थितिर्वर्णिता॥५८॥ विशेषः सोपि यद्येकं वस्त्वनेकत्र वर्ण्यते॥ अंत
र्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे॥५९॥ यथा वा॥ हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे। वत्स
राम गतोसीति संतापिनानुमीयसे॥६०॥ किंचिदारंभतोशक्यवस्त्वंतरकृतिश्च सः। त्वां पश्यता म
या लब्धं कल्पवृक्षनिरीक्षणं॥६१॥ यथा वा॥ स्फुरदद्भुतरूपमुत्प्रताप ज्वलनं त्वां सृजतानवद्यवि
द्यं। विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च॥१॥ अत्राद्ये राजदर्शनारंभेण कल्प
वृक्षदर्शनरूपाशक्यवस्त्वंतरकृतिः। द्वितीये राजसृष्ट्यारंभेण मनोभवादिसृष्टिरूपाशक्यवस्त्वं
तरकृतिः॥६०॥ स्याद्व्याघातोन्यथाकारि तथाकारि क्रियेत चेत्। यैर्जगत्प्रीयते हंति तैरेव कुसुमायु
धः॥६१॥ यद्यत्साधनत्वेन लोकेवगतं तत्केनचित्तद्विरुद्धसाधनं क्रियेत चेत्स व्याघातः॥ यद्वा यत्सा
ना धनतया केनचिदुपात्तं तदन्येन तत्प्रतिद्वंद्विकार्यतद्विरुद्धसाधनं क्रियेत चेत्सोपि व्याघातः॥ तत्राद्य
उदाहृतः॥ द्वितीयो यथा॥ दृशा दग्धं मनसिजं जीवयंति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तु
वो वामलोचनाः॥१॥ सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी। दयोद्वेद्वाल इति मय्यपरित्या
ज्यएवते॥ कार्यविशेषनिष्पादकतया केनचित्संभाव्यमानात्तद्योदयेन कार्यविरोधिनी क्रिया
सौकर्येण समर्थ्यते चेत्सोपि व्याघातः॥ कार्यविरुद्धक्रियायां सौकर्यं कारणस्य सुतरां तदनु

कुवलया० ॥३६॥

गुल्यं ॥ यथा ॥ जेत्रयात्रोन्मुखेन राज्ञा युवराजस्य राज्य एव स्थापने यत्कारणत्वेन संभावितं बाल्यं त
त्स्पृत तद्विरुद्धस्य सहनयेन स्वैव कारणतया युवराजेन परित्यागस्या युक्तत्वं दर्शयता समर्थ्यते।
यथा वा ॥ लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया ॥ दातापि विसृजत्यर्थं तयैव ननु शंकया ॥ अत्र
पूर्वोत्तरार्धे पक्षप्रतिपक्षनिरूपण्यो वचने इतिलक्षणानुगतिः ॥ ६१ ॥ गुंफः कारणमालास्या यथा
प्रा[illegible]कप्रांतकार[illegible] ॥ नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥ ६२ ॥ उत्तरोत्तरकारणभूतपू
र्वपूर्वैः पूर्वपूर्वकारणभूतोत्तरोत्तरैर्वा वस्तुभिः कृतो गुंफः कारणमाला ॥ आद्योदाहृता ॥ द्वितीया य
था ॥ भवति नरकः पापात्पापं दारिद्र्यसंभवं ॥ दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत् ॥ ६३ ॥ गृहीत
मुक्तरीत्यार्थश्रेणिरेकावली मता ॥ नेत्रे कर्णांतविश्रांते कलौ दोस्तंभ[illegible]लिनौ ॥ दोस्तंभौ जानुपर्यंतप्र
लंबन मनोहरौ ॥ ६३ ॥ जानुनी र[illegible]मुकुराकारे लस्य महीभुजः ॥ उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः ॥
पूर्वपूर्वस्योत्तरोत्तरविशेषणभावो वा गृहीतमुक्तरीतिः ॥ तत्राद्यप्रकार उदाहृतः ॥ द्वितीयो यथा ॥ वि
कालालसमेव यस्य विभुता यस्तत्र विद्योतते यत्रामुष्य सुधीभवंति किरणा राशेः स यासामभूत्
यस्तत्त्विस मुषः सुयोस्य हविषे यस्तस्य जीवातवे वोढायद्गुणमेष मन्मथरिपोस्ताः पांतु नो मूर्तयः ॥
दीपकैकावलीयोगान्मालादीपकमिष्यते ॥ स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥ ६४ ॥ अत्र
स्थितिरिति पदमेकं स्मरेण तस्या हृदये स्थितिः कृता ॥ तेन तस्या हृदयेन त्वयि स्थितिः कृतेति ॥ ए
वं वाक्यद्वयान्वयः ॥ अतो दीपकं गृहीतमुक्तरीतिसद्भावादेकावली चेति दीपकैकावलीयोगः ॥ यथा वा ॥ ॥विव॥ ॥३६॥

१ गृहीतं च तन्मुक्तं गृहीतमुक्तं तस्य रीतिर्भावो गृहीतमुक्तरीतिरितिसमासः ।

राजानं लंघितेत्यनेन विरोधालंकाराभिव्यक्त्यर्थं न खल्वित्यत्र पदद्वयविभागात्मकरूपांतरस्य
विवक्षायाः सत्त्वेपि न खलु नातीति न खलु दृश्येक पदे न वस्तु सदर्थांतरे परं रूपांतरमादायेसमालं ते॰
कारोप्यस्त्येव ॥ श्लेषलब्धासद्[illegible]ष्टाकाभिप्रतीतिमात्रेणापि[illegible]दाहरणं ॥ यथा वा ॥ सत्ये तपःसु गतभ॰३
गत्ये यत्त[illegible]स्वा[illegible]बु[illegible]षु रविप्रतीक्ष्णे सतु ॥ अनुभवति सुगति मब्जं[illegible]ख सद्जनमनेसमस्तक
मनीयं ॥ विचित्रं तत्त्वयत्ने श्चेद्विपरीतः फले च्छया ॥ नमंति संतस्त्रैलोक्यादपि लब्धुं समुन्नतिं ॥ १ ॥ यथा
वा ॥ मलिनयितुं खलवदनं विमलयति जगंति देव कीर्तिस्ते ॥ मित्राल्हादं कर्तुं मित्राय[illegible]दुह्यति प्रताप
पि ॥ ११५२ ॥ अधिकं पृथुलाधाराराधेयाधिक्यवर्णनं ॥ ब्रं[illegible]ह्मांडानि जलं यत्र तत्र मांति न ते गुणाः ॥\
॥ ५४ ॥ अत्र यत्र महाजले घ[illegible]नलानि ब्रह्मांडानि बुद्बुदकल्पानी त्याधा[illegible]रस्य विशालत्वं प्रद[illegible] अति
र्श्यते तत्र न मांती त्याधे[illegible]यानां गुणानामाधिक्यं वर्णितं ॥ यथा वा ॥ युगांत कालप्रति संहृतात्मनो ज म
गंति यस्यां सविकाशमासत ॥ तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः ॥ १ ॥ पृथ्वाध
याद्याधाराधिक्यं तदपि तन्मतं ॥ कियद्वाग्ब्रह्म यत्रैते विश्राम्यंति गुणास्तव ॥ ५५ ॥ अत्रैते इति प्रत्य
क्षदृष्टमहावैभवत्वेन उक्तानां गुणानां विश्राम्यंतीत्यसंबाधावस्थानोक्त्या आधारस्य वाग्ब्रह्म
ण आधिक्यं वर्णितं ॥ यथा वा ॥ अहो विशा[illegible]लं भूपाल भुवनत्रितयोदरं ॥ माति मातुमशक्योपि
पि यशो राशिर्यदत्र ते ॥ ५६ ॥ अत्र य[illegible]प्युदाहरणद्वयेपि कियद्वाग्ब्रह्मेति ॥ अहो विशालमिति चा
धारयोः प्रशंसा क्रियते ॥ तथापि तनुत्वेन सिद्धवत्कृतयोः तेनाद्रवं हले भुवनोदरयोर्गुणा यशोराश्यो

संग्रामांगणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादितं॥ कोदंडेन शरा
राः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयं॥९३॥ अत्र येन येन सहसा
यद्यत्समासादितमिति संक्षेप[illegible]क्यस्थितमेकं समासादितपदं कोदंडेन शरा इत्यादिषु षट्स्वपि विव
रणवाक्येषु तत्तदुचितलिंगवचनविपरिणामेनान्वेतीति दीपकं शरादीनामुत्तरोत्तरविशेषणभावादेका
वलीति दीपकै[illegible]कावलीयोगः॥९४॥ उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते॥ मधुरं मधुपीयूषं तस्मात्त
स्मात्कवेर्वचः॥९५॥ यथा वा॥ अंतर्विष्णोस्त्रिलोकी निवसति फणिनामीश्वरे सोपि शेते सिंधोः सोप्यक
देशेतमपि चुलुकयां कुंभयोनिश्चकार॥ धत्ते खद्योतलीलामयमपि नभसि श्रीनृसिंहक्षितींद्र त्वत्कीर्तेः
कर्णनीलोत्पलमिदमपि च प्रेक्षणीयं विभाति॥९६॥ अयं श्लाघ्यगुणोत्कर्षः॥ अश्लाघ्यगुणोत्कर्षो यथा॥
तृणा[illegible]ल्लघुतरस्तूलस्तूलादपि च याचकः॥ वायुना किं न नीतोसौ मामयं प्रार्थयेदिति॥ उभयरूपो यथा॥
गिरिर्महान् गिरेरब्धिर्महानब्धेर्नभो महत्॥ नभसोपि महद्ब्रह्म ततोप्याशा गरीयसी॥ अत्र ब्रह्मप
र्यंतेषु महत्वं श्लाघ्यगुणः॥ प्रकृतार्थे चाशायामश्लाघ्यगुणः॥ यथासंख्यं क्रमेणैव क्रमिकाणां सम
न्वयः॥ शत्रुं मित्रं विपत्तिं च जय रंजय भंजय॥ यथा वा॥ शरपांक्तिं प्रपन्नानि विषवन्मारयंति वा॥ नश्यन्त्यं
ते न भुज्यंते रूपणेन घनानि यत्॥ अमुं क्रमालंकारमिति केचिज्जगुः॥९७॥ पर्यायो यदि पर्यायेणै
कस्यानेकसंश्रयः॥ पद्ममुक्त्वा गता चंद्रं कामिनीवदनप्रभा॥९८॥ अत्र कस्य कामिनीवदन[illegible]
प्रभायाः क्रमेण पद्मचंद्ररूपानेकाधारसंश्रयणं पर्यायः॥ यद्यपि पद्मसंश्रयणं कंठतो नोक्तं॥ तथा

पिपन्नमुक्तेति तत्परित्यागो तस्याः प्राक्तनसंश्रयापाक्षेपेण पर्यायनिर्वाहः ॥ अत एव ॥ श्रोणीबंधस्त्यजति त
नुतां सेवते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां ॥ धत्ते वक्षः कुचसचिवतामद्वितीयं
तु वक्त्रं त्वद्गात्राणां गुणविनिमयः कल्पितो यौवनेन ॥ इत्यत्र पर्यायं कारस्य प्रकाशकार उदाजहार ॥ सर्व
त्राप्युदाहृतः पर्यायो यथा ॥ नन्वाश्रयस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा ॥ प्रागर्ण
वस्य हृदये वृषलक्ष्मणोथ कंठे धुनावससि वाचि पुनः खलानां ॥ ९ ॥ सर्वोप्ययं शुद्धपर्यायः ॥ संकोचप
र्यायो यथा ॥ प्राक्श्रित्वा वसुधामशेषं छाया सुविश्रम्य ततस्तरूणां ॥ प्रौढिंगते संप्रति तिग्मभानौ
शैत्यं शनैरंतरपाममयासीत् ॥ अत्र छायायास्योत्तरोत्तरमाधारसंकोचात्संकोचपर्यायः ॥ विकासपर्या
यो ॥ यथा ॥ बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ॥ अधुना हृदयेप्येष मृगशावाक्षि दृश्यते ॥ अत्र राग
स्य पूर्वाधारापरित्यागेनाधारांतरसंक्रमणमिति विकासपर्यायः ॥ ६९ ॥ एकस्मिन्यद्यनेकं वा प
र्यायः सोपि संमतः ॥ अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि ॥ ७० ॥ यथा वा ॥ पुराभूदस्माकं प्रथमम
विभिन्ना तनुरियं ततो नु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः ॥ इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं हता
नां प्राणानां कुलिशकठिनानां फलमिदं ॥ अत्र दंपत्योः प्रथममभेदः ॥ ततः प्रेयसीप्रियतमभावः ॥ त
तो भार्यापतिभाव इति आधेयपर्यायः ॥ परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः ॥ जग्राहैकं शरं
मुक्त्वा कटाक्षात्स रिपुश्रियं ॥ ७१ ॥ यथा वा ॥ तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यते धुना ॥
येन जर्जरकलेवरव्ययात्क्रीतमिंदुकिरणोज्वलं यशः ॥ परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयंत्रणं ॥

कुवलया० त्रिरसि सेको लक्ष्म्या मनभिभवगंधाः परकथाः ॥ प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः श्रुतेत्यंतासक्तिः
॥३८॥ पुरुषमभिजातं कथयति ॥१॥ क्वचित्कैकृगतानां तु गुंफः कारकदीपकं ॥ गच्छत्यागच्छति पुनः पांथः पश्यति
पृच्छति ॥७२॥ यथा वा ॥ निद्राति स्नाति भुंक्ते चलति कचभरं शोषयत्यंतरास्ते दीव्यत्यक्षैर्न चायं गदितुम
वसरः साय मायाहि याहि ॥ इत्युद्दंडैः प्रभूणामसकृदधिकृतैर्वारिता द्वारि दीनानस्मान्पश्याब्धिकन्ये
सरसिरुहसवामंतरंगैरपांगैः ॥ आद्योदाहरणश्रुतस्य पांथस्य कर्तृकारकस्यैकस्यागमनादिष्वन्वयः ॥
भो: ६ द्वितीये त्वध्याहृतस्य प्रभुकर्तृकारकस्यैव निद्रादिष्वन्वय इत्येकस्यानेकवाक्यार्थान्वये न दीपकच्छायापत्त्या का एक
रकदीपकं ॥ प्रथमसमुच्चयप्रतिद्वंद्वीदं ॥ समाधिः कार्यसौकर्यं कारणांतरसन्निधेः ॥ उत्कंठितां च तरु
णीं जगामास्तं च भानुमान् ॥७३॥ यथा वा ॥ मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ॥ उपकाराय दिष्ट्येत
सं दुदितं घनगर्जितं ॥ केनचित् दारं स्य कार्यस्य कारणांतरसन्निधानात्सौकर्यं तत्सम्यगाधानात्समा ५८
धिः ॥ द्वितीयसमुच्चयप्रतिद्वंद्व्ययं समाधिः ॥ तत्र हि बहूनां प्रत्येकं समर्थानां खलेकपोतिकान्यायेन युगप
म५ त्कार्यसाधनाभि वतारः ॥ अत्र त्वेकेन कार्ये समारिप्सिते अन्यस्य काकतालीयन्यायेनापतितस्य तत्सौ
कर्याधायकत्वमात्रं अत्रोदाहरणमुत्कंठितेति उत्कंठितेव प्रियाभिसरणे पुष्कलं कारणं नाधिकामप्यपेक्ष म
ते ॥ अत्यारूढो हि नारीणामकालज्ञो मनोभव इति न्यायात् ॥ दैवादापततात्तं धकारेण तत्सौकर्यमात्रं स
तमिति ॥ एवं द्वितीयोदाहरणेपि योज्यं ॥७१॥ प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ॥ जैत्रनेत्रानुगौ कर्णावु ॥शिव॥
त्पलाभ्यामधः कृतौ ॥ यथा वा ॥ ममरूपकीर्तिमहरद्भुवि यस्तदनुप्रविष्ट हृदये यमिति ॥ त्वयि मत्सरादिव नि ॥३८॥

रस्तद्वयः सुतरां क्षिणोति खलु तां मदनः ॥ एवं बलवति प्रतिपक्षे प्रतिकर्तुमशक्तस्य तदीयबाधनं प्रत्यनीकमि
ति स्थिते साक्षात्प्रतिपक्षे पराक्रमः ॥ प्रत्यनीकमिति केचिदुक्तमन्यायेन फलमिति ॥ यथा वा ॥ मधुव्रतौघः कुपितः स्व
कीयमधुप्रपापद्मनिमीलनेन ॥ बिंबं समाक्रम्य बलात्कपोलोः कलंकमंके ध्रुवमातनोति ॥७३॥ कैमुत्येनार्थ
संसिद्धिः काव्यार्थापत्तिरिष्यते ॥ स जितस्त्वन्मुखेनेंदुः का वार्ता सरसीरुहां ॥ अत्र सदृत्यनेन पद्मानि येन जिता
नीति विवक्षितं ॥ तथा च सोपि येन जितस्तेन पद्मानि जितानीति किमु वक्तव्यं ॥ इति दंडापूपिकान्यायेन पद्म
जयरूपस्यार्थस्य संसिद्धिः काव्यार्थापत्तिः ॥ तो त्रिका [redacted] र्थापत्तिव्यावर्त्तनाय केव्यं विशेषणं ॥ यथा वा ॥
अधरोयमधीराक्ष्या बंधुजीवप्रभाहरः ॥ अन्यजीवप्रभां हंत हरतीति किमद्भुतं ॥१॥ स्वकीयं हृदयं भित्वा निर्ग
य तौ यौ पयोधरौ ॥ हृदयस्यान्यदीयस्य भेदने का कृपा तयोः ॥२॥७४॥ समर्थनीयस्यार्थस्य काव्यलिंगं समर्थनं ॥ उपकारः
जितोसि मंद कंदर्प मच्चित्तेस्ति त्रिलोचनः ॥ अत्र कंदर्पजयोपन्यासो दुष्कर इति पर्यवसितत्वात्समर्थनसापेक्षः ॥ २७
तस्य मच्चित्तेस्ति त्रिलोचन इति स्वांतःकरणे शिवसन्निधानप्रदर्शनेन [redacted] समर्थनं काव्यलिंगं ॥ व्याप्ति
पक्षधर्मतादि सापेक्षं नैयायिकलिंगं व्यावर्तनाय काव्यविशेषणं ॥ इदं वाक्यार्थहेतुकं काव्यलिंगं ॥ पदार्थ
हेतुकं यथा ॥ भस्मोद्धूलनभद्रमस्तु भवते रुद्राक्षमाले शुभं हा सोपानपरंपरे गिरिसुताकांतालयालंकृते ॥
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥ अत्र
म मोक्षस्य महामोहत्वं प्रसिद्धमिति तत्समर्थने सुखालोकोच्छेदिनीति पदार्थो हेतुः ॥ क्वचित्पदार्थवाक्यार्थौ पि
रपेक्षसापेक्षौ हेतुभावं भजतः ॥ यथा ॥ यद्वक्रं प्रकरजयेति ते विदुषी मर्धनिया बिभर्ति सा ॥ पत्युनाप्य

कुवलया० ॥३९॥ पुरस्कृतेन तत्कुलनाभिकृति चामरेण कः ॥ अत्र मैत्री रस्य दमयंतीकुंतलभारसाम्याभावे विदुषी मूर्धनि य
न्विभाति सेति वाक्यार्थः ॥ पुरस्तु नाप्यपुरस्कृतेनेति पदार्थश्चेत्स्तंभयं मिलितं हेतुः ॥ क्वचित्समर्थनीयार्थसमर्
थनार्थं वाक्यार्थे पदार्थौ हेतुः ॥ यथा वा ॥ वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न क्वापि क्वचिदपि
भवंतं प्रणतवान् ॥ नमन्मुक्तः संप्रत्यहमतनुरग्रेप्यनतिभाङ् महेश क्षंतव्यं तदिदमपराधद्वयमपि ॥ ५ ॥ अत्र
तावदपराधद्वयमपि समर्थनीयं । अस्पष्टार्थत्वात्तत्समर्थनं वपुर्वपरजन्मनोरनमनाभ्यां वाक्यार्थभू
ताभ्यां क्रियते ॥ अत्र द्वितीयवाक्यार्थे अतनुत्वमेकपदार्थो हेतुः ॥ अत्रापि संप्रति नमन्मुक्त इति वाक्यार्थेनि
कपदार्थो वा हेतुः ॥ क्वचित्परस्परविरुद्धयोः समर्थनीययोरुभयोः क्रमादुभौ हेतू भाव्येते ॥ य
था ॥ असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विश्रंभेष्वथ च रसिकः शैलदुहितुः ॥ प्रमो
दं नो दिश्यात्कपटबटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥ ६ ॥ अत्र शिवस्य युग
पत्कृत्रिमबटुवेषापनयनत्वरातदनुवर्तनेच्छयोर्विरुद्धयोः क्रमाद्दुरितोती [illegible] हेतुत्वे
न तत्संलापकौतुकं चेत्स्फभावथौ हेतुत्वेन निबद्धौ ॥ क्वचित्परस्परविरुद्धयोरुभयोः समर्थनीययोरेक एव हे
र तुः ॥ यथा ॥ जीयादंबुधितनयाधररसमास्वादयन्मुरारिः ॥ अंबुधिमथनक्लेशं कलयन्विफलं सफलं
च ॥ ७ ॥ अत्र विफलत्वसफलत्वकलनयोरुभयोर्विरुद्धयोरेक एवांबुधितनयाधररसास्वादो हेतुः ॥ इ
यथा २ दं काव्यलिंगं हेतुं त्वलंकार इति केचिद्व्यवजह्रुः ॥ हे गोदावरि देवि तावकतटे देशो कलिंगः कवि वाग्देवीव ॥शिवम
हुदेशादरोनसरवौत्यक्त्वाविरलिंगितः ॥ एनामर्णवमध्यसंतु सुहृन्मुरभिन्नामी सरोजासनं ब्रह्माणं गमय ॥३९॥

घ

स्नेहक्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवां ॥ ६८ ॥ यथा वा ॥ विलंघयंति श्रुतिवर्त्म यस्यां लीलावतीनां
नयनोत्पलानि । बिभर्ति यस्यामपि वक्रिमाणं मे कोमहाकालजटार्धचंद्रः ॥ आद्योदाहरणे निषे
धः स्पष्टः ॥ द्वितीये लार्थः ॥ ६८ ॥ विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता ॥ सद्यः शिरांसि चापान्वा न
मयंतु महीभुजः ॥ ६९ ॥ अत्र संधिविग्रहप्रमाणप्राप्तयोः शिरश्चापनमनयोर्युगपदुपस्थितयो
र्युगपत्कर्तुमशक्ययोर्विकल्पः ॥ यथा वा ॥ पतत्वंबुधिरत्नं वारिन्नत्वंतिव कलापिनः ॥ अद्य कांतः कृतां
तो वा दुःखस्यांतं करिष्यति ॥ प्रियसमागमश्चेन्मरणमाशंकनीयं मरणे तु न प्रियसमागमसं
भव इति तयोराशंसायां विकल्पः ॥ ६९ ॥ बहूनां युगपद्भावभाजां गुंफः समुच्चयः ॥ नश्यंति पश्चात्प
श्यंति त्रस्यंति च भवद्विषः ॥ ७० ॥ अविरोधेन संभावितयौगपद्यानां भावादीनां गुंफनं समुच्चयः ॥ यथा
वा ॥ बिभ्राणा हृदये त्वया विनिहितं प्रेमाभिधानं नवं शल्यं यद्विदधाति सा विधुरिता साधो तदाकर्ण्य
तां ॥ शेते शुष्यति ताम्यति प्रलपति प्रम्लायति प्रेंखति भ्राम्यत्युल्लुठति प्रणश्यति गलत्युन्मूर्छति त्रुट्यति ॥ इ
अत्र कासांचित्क्रियाणां किंचित्कालभेदसंभवेपि शतपत्रपत्रशतभेदन्यायेन यौगप [illegible] विरहातिशय
द्योतनाय विवक्षितमिति लक्षणानुगतिः ॥ ७० ॥ अहंप्राथमिकाभाजामेककार्यान्वयोपि सः ॥ कुलं रूपं
वयो विद्याधनं च मदयंत्यमुं ॥ ७१ ॥ यत्रैकः कार्यहेतुसिद्धिहेतुत्वेन प्रक्रांतस्तत्रान्येपि यदि अहमह
मिकया खले कपोतिकान्यायेन तत्सिद्धिं कुर्वंति सोपि समुच्चयः ॥ यथा मदं आभिजात्यमेकं समग्रंकार
णं ताद्रूपसैव रूपादिकमपि तत्साधनत्वेनावतरतीति ॥ यथा वा ॥ प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधि

शिष्टविशेषणाभावादित्यर्थः

पदार्थवाक्यार्थबलात्प्रतीयमानोर्थो वाच्योपकारतां भजते। काव्यलिंगेतु ५

क्षितौ कथमसावेकाकिनी स्थास्यतीति॥२॥ इयत्तत्र ब्राह्मणः प्रापणं कथं गोदावर्यां कर्तव्यमित्यसंभावनीया
र्थोपपादकस्यारण्यमध्ये इत्यादितद्विशेषणस्य न्यासनश्लेषाख्यो गुण इति॥ श्लेषाविघटमनार्थघटकार्थस्य वृत्ये
नमितिश्लेषलक्षणमिति वजयदेवेनोक्तं॥ वस्तुतस्तत्रापि पदार्थहेतुकं काव्यलिंगमेव तद्वदकाभावात्॥
ननु साभिप्राय[illegible] पदार्थवाक्यार्थविन्यसनरूपात्परिकरात्काव्यलिंगस्य किं भेदकं॥ उच्यते॥ परिक
रे पदार्थवाक्यार्थयोर्न हेतुभावं भजतः॥ ननु यद्यपि सुखालोकोच्छेदिनी इत्यादि पदार्थहेतुककाव्यलिंगो
दाहरणेप्यनतिमानित्यादि वाक्यार्थहेतुककाव्यलिंगोदाहरणे च पदार्थवाक्यार्थयोर्न हेतुभावं भ
जतस्तथापि पशुनाप्युरस्कृते नेति पदार्थहेतुकोदाहरणे अद्वितेस्ति त्रिलोचन इति वाक्यार्थहेतुकोदाह
रणे च प्रतीयमानार्थस्यापि हेतुकोद्यनुभवे शौ दृश्यते॥ पशुनेत्यविवेकित्वाभिप्रायगर्भं॥ विदुषीत्यस्य प्र
तिनिर्देशात्वा॥ त्रिलोचन इति कंदर्पदाहकतृतीयलोचनत्वाभिप्रायगर्भं॥ कंदर्पजयोपयोगित्वान्तस्य॥ स
त्यं॥ तथापि नतयोः परिकर एव किंतु तद्घटितस्थापि तत्काव्यलिंगमपि॥ प्रतीयमानाविवेकविशिष्टेन पशुना
अन प्युरस्कृतत्वस्यैकपदार्थस्य प्रतीयमानकंदर्पदाहकत्वतृतीयलोचनविशिष्टस्य शिवस्य वित्तसंनि
धानस्य वाक्यार्थस्य च वाच्यस्यैव हेतुभावात्॥ नहि तयोर्व्यंग्ययोर्हेतुभावे ताभ्यां प्रतीयमानं मध्ये भि
विल्हारमस्ति॥ यथा॥ सर्वाशुचिनिधानस्येत्यादि पदार्थपरिकरोदाहरणे सर्वाशुचिनिधानस्येत्
यादिनानेकेन पदार्थेन प्रतीयमानं शरीरस्याऽसंरक्षणीयत्वं॥ यथा च॥ वाक्यार्थपरिकरोदाहर
णे पर्यायोक्तविधया तत्तद्वाक्यार्थेन प्रतीयमानं नाहंप्यासइत्यादित स्मात्पशुनेत्यत्र त्रिलोचन इत्यत्र

कुव॰ व्या॰
॥ ४० ॥

न्नमतीयमानं वाक्यस्यैव पदार्थस्य वा वाक्यार्थस्य च हेतुभावेनोपपादकतया काव्यलिंगस्यांगमेव ॥ यथा ॥
यत्त्वन्नेत्रसमानकांति सलिले मग्नं तदिंदीवरमित्यनेक वाक्यार्थहेतुकं काव्यलिंगोदाहरणं त्वन्नेत्रसमानकां
तीत्यादिकानिंदीवरशशिहंसविशेषणानि तेषां वाक्यार्थो न हेतुभावेनोपपादकानीति तत्र वाक्यार्थहे
तुककाव्यलिंगे पदार्थहेतुककाव्यलिंगमंगमिति न तयोः काव्यलिंगोदाहरणत्वे काचिदनुपपत्तिः ॥ ७५ ॥
उक्तिरर्थांतरन्यासः स्यात्सामान्यविशेषयोः ॥ हनूमानब्धिमतरद्दुष्करं किं महात्मनां ॥ ७६ ॥ गुणवद्वस्तुसंस
र्गाद्याति स्वल्पोपि गौरवं ॥ पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते ॥ सामान्यविशेषयोर्द्वयोरप्युक्तिरर्थां
तरन्यासस्तत्रैकं प्रस्तुतमन्यदप्रस्तुतं भवति ॥ तत्र विशेषे प्रस्तुते तेन सहाप्रस्तुतसामान्यरूपस्य
सामान्ये प्रस्तुते तेन सहाप्रस्तुतविशेषरूपस्यार्थांतरस्य न्यसनमर्थांतरन्यास इत्युक्तं भवति ॥ तत्राद्यस्य
द्वितीयार्धमुदाहरणं द्वितीयस्य द्वितीयश्लोकः ॥ न चायं काव्यलिंगान्नातिरिच्यते ॥ तथाहि ॥ उदाहरण
द्वयेप्यप्रस्तुतयोः सामान्यविशेषयोरुक्तिः प्रस्तुतयोर्विशेषसामान्ययोः कथमुपकरोतीति विवेक्त
व्यं ॥ नहि सर्वथैवाप्रस्तुतानन्वय्यप्रस्तुताभिधानं युज्यते ॥ न तावदप्रस्तुतप्रशंसायामिवाप्रस्तुतव्यं
जकतया प्रस्तुतयोरपि विशेषसामान्ययोः स्वशब्दोपात्तत्वात् ॥ नाप्यनुमानालंकारवत्प्रस्तुतप्रती
तिजनकतया लिंगादिव्याप्तिपक्षधर्मताद्यभावात् ॥ नापि दृष्टांतालंकारवदुपमानतया विशेष्यधा
तदोषः प्रसववधायरवत्स्य वीरेखेपकरः ॥ वनतरुभंगे धूनिश्चित्तहरि निद्रालस्करः कीरणइत्यादिषु सामा ॥ श्रीः ॥
न्यविशेषस्योपमानत्वदर्शनेपि विशेषसामान्यस्य क्वचिदपि तद्दर्शनात् ॥ उपमानतया तदन्वये सा ॥ ४० ॥

कुवलया० ॥४१॥

स्य बुधावारोहाय पुनर्विशेषान्तरस्य न्यासप्रसंग इति वाच्यं इष्टापत्तेः ॥ अत एव विषये विकस्वरालंकारस्या
नुपदमेव दर्शयिष्यमाणत्वात् ॥ किंच काव्यलिंगेपि न सर्वत्र समर्थनसापेक्षत्वनियमः ॥ चिकुरप्रकरा जयं
ति ते इत्यत्र तदभावात् ॥ उपमानवस्तुषु वर्णनीयसाम्याभावेन निंदायाः कविकुलक्षुण्णत्वेनात्र समर्थ
नापेक्षाविरहात् ॥ हितदास्यदासेपि गतोधिकारितां न शारदः पार्वणशार्वरीश्वरः इत्यादिषु समर्थनं दृश्य
ते ॥ नीवेव भ्रुकुंपा न शस्त्रेण नाग्निना न च मृत्युना ॥ अप्रतीकारपारुष्याः स्त्रीभिरेव स्त्रियः कृता इत्यादिका
व्यलिंगविषयेषु समर्थनापेक्षाविरहेप्यप्रतीकारपारुष्या इत्यादिना समर्थनदर्शनात् ॥ नहि तत्र स्त्रीण
विषादिनिर्मितत्वाभावप्रतिपादनं समर्थनसापेक्षं प्रसिद्धत्वात् ॥ तस्मादुभयतो व्यभिचारात् ॥ समर्थनसा
पेक्षसमर्थने काव्यलिंगं तन्निरपेक्षसमर्थने अर्थान्तरन्यास इति न विभागः ॥ किंतु समर्थ्यसमर्थकयोः सा
मान्यविशेषसंबंधेऽर्थान्तरन्यासः तदितरसंबंधे काव्यलिंगमित्येव व्यवस्थावधारणीया ॥ प्रपंचश्चित्र
मीमांसायां द्रष्टव्यः ॥ एवमप्रकृतेन प्रकृतस्य समर्थनमुदाहृतं ॥ प्रकृतेनाप्रकृतसमर्थनं यथा ॥ य
दुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः ॥ तथाहि ते शीलमुदारदर्शने तपस्विनाम
प्युपदेशतां गतं ॥१॥ यथा वा ॥ दानं ददत्यपि जलैः सहसाधिरूढे को विद्यमानगतिरासितुमुत्सहेत
यद्दंतिनः कटकटाहतटान्मिमंक्षोर्मंक्षूदपाति परितः पटलैरलीनां ॥२॥ यस्मिन्विशेषसामान्यवि
शेषः स विकस्वरः ॥ स न जिग्ये महान्तो हि दुर्धर्षाः सागरा इव ॥ यत्र कस्यचिद्विशेषस्य समर्थनार्थं सा
मान्यं विन्यस्य तत्प्रसिद्धावप्यपरितुष्यता कविना तत्समर्थनाय पुनर्विशेषान्तरमुपमानरीत्यार्थान्त ॥४१॥

रन्यासविधया वा विन्यस्यते तत्र विकस्वरालंकारः ॥ उत्तरार्धं यथा कथंचिदुदाहरणं ॥ इदं तु यत्कृमुदा
हरणं ॥ अनंतरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं ॥ एको हि दोषो गुणसन्निपाते निम
ज्जतीन्दोः किरणेष्विवांकः ॥ इदमुपमानरीत्या विशेषान्तरस्य न्यसने उदाहरणं ॥ अर्थान्तरन्यासवि
धया यथा ॥ कर्णारुंतुदमंतरेण रणितं गाहस्व काक स्वयं माकंदं मकरंदशालिनमिह त्वां मन्म
हे कोकिलं ॥ धन्यानि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां नेपालक्षितिपालभालपतिते पंकेन
शंकेत कः ॥१९॥ मालिन्यमब्जशशिनोर्मधुलिट्कलंकौ धत्तो मुखेन तुलयत्कृतिरकौजनाभौ ॥ दृ
ष्टा बितः कुचनमेलकृतो गुणत्वं वृत्तौ एतेहि वसिभ्रमविप्रलंभौ ॥७७॥ प्रौढोक्तिरुत्कर्षा
हेतौ तद्धेतुत्वप्रकल्पनं ॥ कचाः कलिंदजातीरतमालस्तोममेचकाः ॥७८॥ उत्कर्षाहेतौ तद्धे
तुत्वप्रकल्पनं प्रौढोक्तिः ॥ यथा ॥ तमालगतनैल्यातिशयाहेतौ यमुनातटरोहणे तद्धेतुत्वप्रकल्प
नं ॥ यथा वा ॥ कल्पतरुकामदोग्ध्रीचिंतामणिधनदशंखानां ॥ रचितो रजोभिरपयस्तेजःश्वासान्तरांबरैर्वे
धाः ॥ अत्र कल्पवृक्षादिकेषु वितरणातिशयवर्णनीयराजवितरणहेलो कल्पवृक्षपरागादिरूपपंचभू
शा५ तनिर्मितत्वेन तद्धेतुत्वप्रकल्पनं प्रौढोक्तिः ॥७९॥ संभावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ॥ यदि शे
षो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥८०॥ यथा वा ॥ कस्तूरिकामृगाणामंडाद्गंधगुणमखिलमादाय ॥ य
दि पुनरहं विधिः स्यां खलजिह्वायां निवेशयिष्यामि ॥ यद्यर्थोक्तौ च कल्पनमतिशयोक्तिभेद इति काव्य
प्रकाशाकरः ॥ किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं ॥ मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं

कुवलया०
॥४२॥

वहन्त्र॥८८॥ अत्र वेश्यावशीकरणस्यासंभावितत्वसिद्धये गगनकुसुममालिकाधारणरूपार्थान्त-
रकल्पनं मिथ्याध्यवसितिः॥ यथा वा॥ अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया प्रज्ञाच-
क्षुरवेक्ष्यमाणबधिरश्राव्याः किलाकीर्तयः॥ गीयंते स्वरमष्टमं कलयता जातेन वंध्योदरान्मूकानां प्र-
करेण कूर्मरमणीदुग्धोदधे रोधसि॥८९॥ अत्राद्योदाहरणं निदर्शनागर्भं॥ द्वितीयं तु शुद्धं॥ असंबंधे
संबंधरूपायामतिशयोक्तौ मिथ्याध्यवसितेः किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थांतरकल्पनात्मना
विच्छित्तिविशेषेण भेदः॥७१॥ प्रस्तुतवर्ण्यवाक्यार्थप्रतिबिंबकस्यार्थस्य वर्णनं॥ ललितं निर्गते नीरे से-
तुमेषा चिकीर्षति॥८०॥ प्रस्तुते धर्मिणि यो व्यवहारो वर्णनीयो तं वृत्तांतमनुक्त्वा तत्र तत्प्रतिबिंबरूपस्य
कस्यचिदप्रस्तुतवृत्तांतस्य वर्णनं ललितं॥ यथा कथंचिद्दाक्षिण्यसमागतस्य कालोपेक्षितप्रतिनि-
वृत्तनायिकांतरासक्तनायकानुनयनार्थं सखीं प्रेषयितुकामां नायिकामुद्दिश्य सख्या वचनेन तत्प्राप्तरूपप्रति-
बिंबभूतगतजलसेतुबंधवर्णनं॥ नेयमप्रस्तुतप्रशंसा॥ प्रस्तुतधर्मिकत्वात्॥ नापि समासोक्तिः॥ प्रस्तु-
तवृत्तांते वर्ण्यमाने श्लेषेण विशेषणसाधारण्येन सारूप्येण वा अप्रस्तुतवृत्तांतस्फूर्त्यभावात्॥ अ-
प्रस्तुतवृत्तांतादेव सरूपादिह प्रस्तुतवृत्तांतस्य गम्यत्वात्॥ नापि निदर्शना॥ प्रस्तुताप्रस्तुतवृत्तांतयोस्त-
योः शब्दोपात्तयोरैक्यसमारोपणेव तस्याः समुन्मेषात्॥ यदि विषयविषयिणोः शब्दोपात्तयोः प्रवर्तमा-
नएवालंकारो विषयिमात्रोपादानेपि स्यात्तदा रूपकमेव भेदेप्यभेदरूपायामतिशयोक्तेरपि विषयमा- ॥शिव॥
क्रामेत्॥ ननु तर्हि अत्र प्रस्तुतार्थनायकादिनिगरणेन तत्र शब्दोपात्ताप्रस्तुतार्थेनाशयभेदाध्यवसाय ॥४२॥

मंजस्याप्रतीतेश्च॥ तस्मात्प्रस्तुतसमर्थकतयैवाप्रस्तुतस्योपयोग इहापि वक्तव्यः॥ ततश्च वाक्यार्थहेतुकं का-
व्यलिंगमेवात्रापि स्यात्॥ न त्वलंकारांतरस्यावकाश इति चेत्॥ अत्र केचित् समर्थनसापेक्षस्यार्थस्य समर्थ-
ने काव्यलिंगं॥ निरपेक्षस्यापि प्रतीतिवैभवात् समर्थने अर्थांतरन्यासः॥ नहि यत्वन्नेत्रसमानकांतीत्यादिका-
व्यलिंगोदाहरणेष्विवापगदे शरदा शशांके प्रावृड्यये शान्ततडित्कटाक्षा॥ कासां न सौभाग्यगुणोंगनानां
नानष्टः परिभ्रष्टपयोधराणां॥ दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारं॥ क्षुद्रेपि नूनं शर-
णं प्रपन्ने ममत्वमुच्चैः शिरसामतीव॥ इत्याद्यर्थांतरन्यासोदाहरणेषु प्रस्तुतस्य समर्थनापेक्षत्वमस्तीति॥
वस्तुतस्तु प्रायोवादोयं॥ अर्थांतरन्यासेपि हि विशेषस्य सामान्येन समर्थनानपेक्षत्वेपि सामान्यं विशे-
षेण समर्थनमपेक्षत एव॥ निर्विशेषं न सामान्यमिति न्यायेन॥ बहुनामप्यसाराणां संयोगः कार्यसाध-
कः इत्यादिसामान्यस्य तृणैरारभ्यते रज्जुस्तया नागोपि बध्यत इत्यादिसंप्रतिपन्नविशेषावतरणं वि-
नाबुद्धौ प्रतिष्ठितत्वासंभवात्॥ न च तत्र सामान्यस्य कासां न सौभाग्यगुणोंगनानामित्यादौ विशेषस-
प्रसिद्धतया मर्थने सामान्यस्य लोकसंप्रतिपन्नतया विशेषावतरणं विनैव बुद्धौ प्रतिष्ठितत्वं संभवतीति श्लो-
के तन्न्यसनं नापेक्षितमिति वाच्यं॥ सामान्यस्य सर्वत्र लोकसंप्रतिपन्नत्वनियमाभावात्॥ नहि यो
यो धूमवान् सोग्निमानिति व्याप्तिरूपसामान्यस्य लोके संप्रतिपन्नतया यथा महानस इति तद्विशेषरूप-
दृष्टांतानुपादानसंभवमात्रेण प्रसिद्धव्याप्तिरूपसामान्योपन्यासेपि तद्विशेषरूपदृष्टांतोपन्यासनैर-
पेक्ष्यं संभवति॥ न चैवं सामान्येन विशेषसमर्थनस्थलेपि क्वचित्तस्य सामान्यस्य लोकप्रसिद्धत्वाभावे त-

कुवलया० ॥४२॥

बहन्॥८०॥ अत्र वेश्यावशीकरणास्यासंतासंभावितत्वसिद्ध्ययेगमनकुसुममालिकाधारणरूपार्थांत
रकल्पनं मिथ्याध्यवसितिः॥ यथा वा॥ अस्य क्षोणिपतेः परार्धपरया लक्ष्मीकृताः संख्यया प्रज्ञाच
क्षुरवेक्ष्यमाणबधिरश्राव्याः किलाकीर्तयः॥ गीयंते स्वरमष्टमं कलयता जातेन वंध्योदरान्मूकानां प्र
करेण कूर्मरमणीदुग्धोदधे रोधसि॥७९॥ अत्राद्योदाहरणं निदर्शनागर्भं॥ द्वितीयं तु शुद्धं॥ असंबंधे
संबंधरूपा या अतिशयोक्तिः तो मिथ्याध्यवसितेः किं विभिन्नं मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थांतरकल्पनात्मना
विच्छित्तिविशेषाभेदः॥७९॥ प्रस्तुतवर्णवाक्यार्थप्रतिबिंब~~काक्यार्थ~~स्य वर्णनं॥ ललितं निर्गते नीरे से
तुमेषा चिकीर्षति॥८०॥ प्रस्तुते धर्मिणि यो वर्णनीयो वृत्तांतस्तमवर्णयित्वा तत्रैव तत्प्रतिबिंबरूपस्य
कस्यचिदप्रस्तुतवृत्तांतस्य वर्णनं ललितं॥ यथा कथंचिद्दाक्षिण्यसमागतस्त्र कालोपेक्षितप्रतिनि
वृत्तनायिकांतरासक्तनायकानयनार्थं सखीं प्रेषयितुकामतापिकामुद्दिश्य सख्या वचनेन तद्व्यापारप्रति
बिंबभूतगतजलसेतुबंधवर्णनं॥ नेयमप्रस्तुतप्रशंसा॥ प्रस्तुतधर्मिकत्वात्॥ नापि समासोक्तिः॥ प्रस्
तवृत्तांते वर्ण्यमाने श्लेषेण विशेषणसाधारण्येन सारूप्येण वा अप्रस्तुतवृत्तांतस्फूर्त्यभावात्॥ अ
प्रस्तुतवृत्तांतादेव सरूपाद्धि प्रस्तुतवृत्तांतस्य गम्यत्वात्॥ नापि निदर्शना॥ प्रस्तुताप्रस्तुतवृत्तांत
योः शाब्दोपात्तयोरैक्यसमारोपण एव तस्याः समुन्मेषात्॥ यदि विषयविषयिणोः शाब्दोपात्तयोः प्रवर्तमा
नएवालंकारो विषयिमात्रोपादानेपि स्यात्तदा रूपकमेव भेदेप्यभेदरूपा या अतिशयोक्तेरपि विषयमा ॥शिव॥
क्रामेत्॥ ननु तर्हि अत्र प्रस्तुतार्थनायकादिनिगरणेन तदनुशरोपात्ताप्रस्तुतार्थेनाशयभेदाध्यवसाय ॥४२॥

मंजस्याप्रतीतेश्च॥ तस्मादप्रस्तुतसमर्थकतयैवाप्रस्तुतस्योपयोग इहापि वक्तव्यः॥ ततश्च वाक्यार्थहेतुकं का
व्यलिंगमेवात्रापि स्यात्॥ न त्वलंकारांतरस्यावकाश इति चेत् अत्र केचित् समर्थनसापेक्षस्यार्थस्य समर्थ
ने काव्यलिंगं॥ निरपेक्षस्यापि प्रतीतिवैभवात् समर्थनेर्थांतरन्यासः॥ नहि यत्त्वन्नेत्रसमानकांतीत्यादिका
व्यलिंगोदाहरणेष्विवाथोपगूढे शरदा शशांके प्रावृड्ययौ शांततडित्कटाक्षा॥ कासांन सौभाग्यगुणोंगना
नां नष्टः परिभ्रष्टपयोधराणां॥ दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारं॥ क्षुद्रेपि नूनं शर
णं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव॥ इत्यादावर्थांतरन्यासोदाहरणेषु प्रस्तुतस्य समर्थनापेक्षत्वमस्तीति॥
वस्तुतस्तु प्रायोवादोयं॥ अर्थांतरन्यासेपि हि विशेषस्य सामान्येन समर्थनानपेक्षत्वेपि सामान्यं विशे
षेण समर्थनमपेक्षत एव॥ निर्विशेषं न सामान्यमिति न्यायेन॥ बहूनामप्यसाराणां संयोगः कार्यसाध
क इत्यादिसामान्यस्य तृणैरारभ्यते रज्जुस्तया नागोपि बध्यत इत्यादिसंप्रतिपन्नविशेषावतरणं वि
ना बुद्धौ प्रतिष्ठितत्वासंभवात्॥ न च तु च सामान्यस्य कासांन सौभाग्यगुणोंगनानामित्यादिविशेषस
प्रसिद्धतया
मर्थने सामान्यस्य च लोकसंप्रतिपन्नतया विशेषावतरणं विनैव बुद्धौ प्रतिष्ठितत्वं संभवतीति श्लो
केतन्न्यसनं नापेक्षितमिति वाच्यं सामान्यस्य सर्वत्र लोकसंप्रतिपन्नत्वनियमाभावात्॥ नहि यो
यो धूमवान् स सोग्निमानिति व्याप्तिरूपसामान्यस्य लोके संप्रतिपन्नतया यथा महानस इति तद्विशेषरूप
दृष्टांतानुपादानसंभवमात्रेण प्रसिद्धव्याप्तिरूपसामान्योपन्यासेपि तद्विशेषरूपदृष्टांतोपन्यासनैर
पेक्ष्यं संभवति॥ नचैवं सामान्येन विशेषसमर्थनस्थलेपि कुवित्तस्य सामान्यस्य लोकप्रसिद्धत्वाभावेत

इति भेदेनैव अभेदरूपातिशयोक्तिरस्तु ॥ एवं तर्हि सारूप्यनिबंधनाप्रस्तुतप्रशंसाविषयेऽपि सैवातिशयोक्तिः
स्यात् अप्रस्तुतधर्मिकत्वान्न भवतीति चेन्न ॥ तत्राप्यप्रस्तुतधर्मिवाचकपदस्यापि प्रसिद्धातिशयोक्त्युदा
पा हरणेष्विव प्रस्तुतधर्मिलक्षकत्वसंभवात् ॥ नन्वप्रस्तुतप्रशंसायां सरूपादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्या
व र्थो गम्यते ॥ न त्वतिशयोक्ताविव विषयिवाचकैस्तत्तत्पदैर्विषया लक्ष्यंत इति भेदस्तु यत्तर्हि इहापि प्रस्तु
तगतादप्रस्तुतवृत्तांततद्रूपाद्वाक्यार्थात्तद्गतप्रस्तुतवृत्तांतरूपो वाक्यार्थो विगम्यत इत्येवातिशयोक्तितो
भेदोस्तु ॥ वस्तुतस्तु ॥ सोऽपूर्वरसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः सामदविस्मृतस्वपरदिङ्क्
भूयसोक्तेन वा ॥ पूर्वं निश्चितवानसि भ्रमर हे यद्वारणोऽद्याप्यसावंतःशून्यकरो निषेव्यत इति भ्रातः क
एष ग्रहः ॥ इत्याद्यप्रस्तुतप्रशंसोदाहरणे प्रथमप्रतीतादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थो विगम्यत इत्येतत्
न्न घटते ॥ अप्रस्तुतवारणस्य भ्रमरसेव्यत्वे कर्णचापलमात्रस्य भ्रमरनिराकरणहेतुत्वसंभवेऽपि र त्य
सनाविपर्ययांतःशून्यकरत्वयोर्हेतुत्वासंभवेन मदस्य प्रस्तुततत्सेव्यत्व एव हेतुत्वे न रसनाविपर्ययां
दीनां तत्र हेतुत्वान्वयार्थं वारणपदस्य दुष्प्रभुरूपविषयकोऽङ्गीकारेणैव प्रवृत्तेर्वक्तव्यत्वादेवं सत्यपि यद्य
प्रस्तुतसंबोधनादिविच्छित्तिविशेषात्तत्राप्रस्तुतप्रशंसाया अतिशयोक्तितो भेदो घटते ॥ तदात्रापि प्रस्तुतध ६८
र्मिणं स्वपदेन निर्दिश्य तत्राप्रस्तुतवर्णनारूपस्य विच्छित्तिविशेषस्य सद्भावात् ततो भेदः सुतरां घटते ॥ प
श्यनीलोत्पलद्वंद्वान्निःसरंति ॥ वापी कापि स्फुरति गगने तत्परं सूक्ष्मपद्येत्यादिषु प्रस्तुतस्य कस्य विषर्मिणः
स्ववाचकेनानिर्दिष्टत्वादतिशयोक्तिरेवैतेन ममृतजलसेतुबंधवर्णनादिष्विह संबंधे संबंधो रूपातिशयोक्तिरस्ति वर्णन

कुवलया०
॥४३॥

त्तिरूपं कापि निरस्ता ॥ तथा सति कस्त्वं भोः कथयमीत्यादावपि तत्प्रसंगात्सादृश्यनिबंधनाप्रस्तुतवाक्यार्थो
वगतिरूपविच्छित्तिविशेषेणालंकारांतरकल्पनमिहापि तुल्यं ॥ तस्मात्सर्वालंकारविलक्षणमिदं ललि
तं ॥ यथा वा ॥ क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ॥ तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं ॥ अत्रा
पि निदर्शनाभ्रांतिर्न कार्या ॥ अल्पविषयया मत्या सूर्यवंशवर्णनमिच्छुरहमिति प्रस्तुतवृत्तांतानुपन्या
सात्तत्प्रतिबिंबभूतस्योडुपेन सागरं तितीर्षुरस्मीति अप्रस्तुतवृत्तांतस्यैव वर्णनेनादौ विषमालंकारविन्यासे स्य
न च केवलस्य तत्र तात्पर्यस्य गम्यमानत्वात् ॥ यथा वा ॥ अनायि देशः कतमस्त्वयाद्य वसंतमुक्तस्य दशां वन
स्य ॥ त्वदाप्तसंकेततया कृतार्था श्राव्यापि नानेन जनेन संज्ञा ॥ अत्र कतमो देशस्त्वया परित्यक्त इति प्रस्तु
तार्थमनुपन्यस्य वसंतमुक्तस्य वनस्य दशामनायीति तत्प्रतिबिंबभूतार्थमात्रोपन्यासल्ललितालंकारः ॥
उत्कंठितार्थसंसिद्धिर्विनायत्नं प्रहर्षणं ॥ तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका ॥ ९० ॥ उत्कंठा इष्ट
विशेषः ॥ सर्वेंद्रियसुखास्वादो यत्रास्तीत्यभिमन्यते ॥ तत्प्राप्तीच्छां ससंकल्पामुत्कंठां कवयो विदुरित्युक्तल
क्षणा ॥ तद्विषयस्यार्थस्य तदुपायसंपादनयत्नं विना सिद्धिः प्रहर्षणमुदाहरणं स्पष्टं ॥ यथा वा ॥ मेघै
र्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ॥ इत्थं नंदनिदेशतश्चलित
योः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः ॥ २१ ॥ अत्र राधामाधवयोः परस्परमु
त्कंठितत्वं प्रसिद्धेतरमपि च ग्रंथकारेण निबद्धमित्यत्रोदाहरणे लक्षणानुगतिः ॥ ९० ॥ वांछितादधिकार्थ ॥ त्रिव ॥
स्य संसिद्धिश्च प्रहर्षणं ॥ दीपमुद्योजयेद्यावत्तावदभ्युदितो रविः ॥ ९१ ॥ स्पष्टं ॥ यथा वा ॥ चातकस्त्रिचतुरः ॥४२॥

कुवल० ॥४४॥ क्रौर्यदोषस्तात्तस्य बकानां वधं विना निर्गमनं गुणत्वेन वर्णितं ॥ अनेनैव क्रमेणोदाहरणांतराणि ॥ यथा वा ॥
पदयं रथसंक्षोभाद्धंसेनांसोऽभिपातितः ॥ एकः कृती मृदंगेषु शेषमंगे भुवो भरः ॥१॥ अत्र नायिकासौंदर्य
गुणेन तद्धंसनिपीडितस्यांसस्य कृतित्वगुणो वर्णितः ॥ लोकानंदनचंदनद्रुमसखे नास्मिन्वने स्थीय
तां दुर्वंशोऽयं पुरुषैरसारहृदयैराक्रांतमेतद्वनं ॥ ते सम्योन्यविघर्षजातदहनज्वालावलीसंकुला न स्वान्ये
व कुलानि केवलमिदं सर्वं दहेयुर्वनं ॥ अत्र वेणूनां परस्परसंघर्षसंजात[illegible]दनेहसंकुलत्वदोषेण वनना
शरूपदोषो वर्णितः ॥ दानार्थिनो मधुकरा यदि कर्णतालैर्दूरीकृताः करिवरेण मदांधबुध्या ॥ तस्यैव गंड
युगमंडनहानिरेषा भृंगाः पुनर्विकचपद्मवने चरंति ॥१॥ अत्र भ्रमराणामलंकरणत्वगुणेन गजस्य
तत्संपत्तिपोक्षो दोषत्वेन वर्णितः ॥ आघ्रातं परिचुंबितं प्रतिमुहुर्लीढं पुनश्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा न
तत्र व्यथां मा कृथाः ॥ हे सद्रत्न तवैतदेव कुशलं यद्वानरेणादरादंतःसारविलोकनव्यसनिना चूर्णीकृतं ना[illegible] स्मना
[illegible]॥ अत्र वानरस्य चापलदोषेण रत्नस्य चूर्णनाभावो गुणत्वेन वर्णितः ॥ अत्र प्रथमचतुर्थयो रुल्लासा
न्वर्थः ॥ मध्यमयो[illegible]श्च त्रिष्यायेन लाक्षणिकः ॥ ताभ्यां तौ यदि न स्यातामवज्ञा तद्धृतिस्तु सा ॥ स्वल्पमेव
बु लभते [illegible] प्रस्थं प्राप्यापि सागरं ॥ मीलंति यदि पद्मानि का हानिरमृतद्युतेः ॥ ताभ्यां गुणदोषाभ्यां
तौ गुणदोषौ ॥ अत्र कस्यचिद्गुणेनान्यस्य गुणलाभे द्वितीयार्धमुदाहरणं ॥ दोषेण दोषस्याप्राप्तौ तृतीया
र्धं ॥ यथा वा ॥ मदुक्तिश्चेदंतर्मदयति सुधीभूय सुधियः किमस्या नाम स्याद्र[illegible] सपुरुषानादरभरैः ॥ यथा ॥द्वित्रि२
यूनस्तरुदूसरमरमणीयापि रमणी कुमाराणामंतःकरणहरणं नैव कुरुते ॥ त्वे वेसंचरसेऽदूषणलघुता ॥४४॥

कानाम दिग्दंतिनां व्यालैः कंकणभूषणानि कुरुषे हानिर्न हेम्नामपि ॥ मूर्धन्यं कुरुषे सितांशुमयशः किं नाम
लोकत्रयीदीपस्यांबुजबांधवस्य जगतां मोऽशोसि किं ब्रूमहे ॥१॥ अत्राद्ये क्षेबिता रमणीगुणश्यां अलंकारस
बालं हृदयोल्लासरूपगुणभावो वर्णितः ॥ द्वितीये परमेश्वरानंगीकरणदोषेणादिग्गजानां दोलघुता दि
दोषाभावो वर्णितः ॥ दोषस्याभ्यर्थनानुसार्तन्नैव गुणदर्शनात् ॥ विपदः संतु नः शश्वद्यासु संकीर्त्यते हरिः ॥
यथा वा ॥ मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे ॥ नरः प्रत्युपकारार्थी विपत्तिमभिकांक्षति ॥२॥ अहन्मतत्प्र
तिरामस्योक्तिः ॥ अत्र प्रत्युपकाराभावो दोषस्तदभ्युपगमे हेतुर्गुणो विपत्त्याकांक्षायाः अप्रसक्तिः ॥ सावध
तिरेकमुखप्रवृत्ते न सामान्येन विशेषसमर्थनरूपेणार्थांतरन्यासेन दर्शितं ॥ यथा वा ॥ भेवहुवनेदेहल्ली
विकटलुंडदंडाहति[illegible]कुटकोटिभिर्मघवदंतिभिर्यतैः ॥ भेजे मम भवदंतिके प्रकृतिमेत्य पैशाचिकी न
तें त्रिदिवसंपदं प्रमथनाथ नाथामहे ॥ लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं ॥ अखिलेषु विहंगेषु
हंत स्वच्छंदचारिषु ॥ शुकपंजरबंधस्ते मधुराणां गिरां फलं ॥ दोषस्य गुणत्वकल्पनं गुणस्य दोषत्वकल्प
नं च लेश उदाहरणं ॥ राज्ञो बहुमते विदुषि पुत्रे विदेशं गत्वा धान्यो प्रवसति तद्दर्शनोत्कंठितस्य द्विजस्य गृहे
स्थितस्यापि तु वचनमप्रस्तुतप्रशंसारूपं ॥ तत्र प्रथमार्धे इतरविहंगानामवकृत्त्वदोषस्य स्वच्छंदचरणा
नुकूलतया गुणत्वं कल्पितं ॥ द्वितीयार्धे मधुरभाषित्वस्य गुणस्य पंजरबंधहेतुतया दोषत्वं कल्पितं ॥ न वा
त्र व्याजस्तुतिराशंकनीया ॥ न ह्यत्र विहंगांतर[illegible]णस्तुतिर्व्याजेन निंदायां शुकस्य निंदाव्याजेन स्तुतौ वा ता
त्पर्यं ॥ किं तु पुत्रदर्शनोत्कंठितस्य दोषगुणयोर्गुणदोषत्वाभिमान एवात्र श्लोके निबद्धः ॥ यथा वा ॥ संतः स

कुवलं०
॥४५॥न

त्रिपा५

द्युरितोदयव्यसनिनः प्रादुर्भवद्यंत्रणाः सर्वत्रैव जनापवादचकिता जीवंति दुःखं सदा ॥ अव्युत्पन्नमतिः स
लेनसता नैवासता व्याकुलो युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः ॥ दंडी त्वत्रोदाजहार ॥ युवैष गुण
वान् राजा योग्यस्ते पतिरूर्जितः ॥ रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि ॥ १ ॥ चपलो निर्दयश्चासौ जनः
किं तेन मे सखि ॥ आगः प्रमार्जनायैव चाटवो येन शिक्षिताः ॥ अत्राद्यश्लोके राज्ञो वीर्यविषया स्तुतिः कन्या
या निरंतरसंभोगाद्यभिवांछा दोषत्वेन प्रतिभासतामित्यभिप्रेत्य विदग्धया सख्या राजप्रकोपपरिजिही
र्षया स एव दोषो गुणत्वेन वर्णितः ॥ उत्तरश्लोके स तैरभिरूपदिष्टमानं कर्तुमशक्नुयापि तासामग्रतो मानप
रिग्रहानुगुण्यं प्रतिज्ञाय तदनिर्वाहमाशंकमानया सखीनामुपहासं परिजिहीर्षया नायिकया नायकस्य
चाटुकारिताऽऽनुगुण्येन एव दोषत्वेन वर्णितः ॥ नवाद्यश्लोके स्तुतिर्निंदापर्यवसायिनी द्वितीयश्लोके निंदा स्तुतिपर्य
वसायिनीति व्याजस्तुतिराशंकनीया ॥ राजप्रकोपादिपरिहारार्थमिह निंदास्तुत्योरन्यादिदिति लेशालंकारो ह्यत्र
न ततो विशेषादिति वस्तुतस्तु इह व्याजस्तुतिसद्भावेऽपि न दोषः ॥ न ह्येतावता लेशमात्रस्य व्याजस्तुत्यंतर्भावप्रस
ज्यते तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शितत्वात् ॥ नापि व्याजस्तुतिमात्रस्य लेशांतर्भावः प्रसज्यते भिन्नवि
षयव्याजस्तुत्युदाहरणेषु कस्तूरीवानरराम वंद्यभवने लेखार्थसेवाहको यद्वक्रे मुहुरीक्षसे न धनिनां ब्रूषे न च
टून्मृषा इत्यादिषु दोषगुणीकरणस्य गुणदोषीकरणस्य चाभावात् ॥ अत्रान्यगुणदोषाभ्यामन्यत्र गुण ॥श्रीव॥
दोषयोः प्रतीतेर्विषये कुत्रापि ॥ इंदोर्लक्ष्म त्रिपुरजयिनः कंठमूलं मुरारिर्दिङ्नागानां मदजलमषीभां
जि गंडस्थलानि ॥ अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्तान्याभासंते वद धवलितं किं यशोभिस्त्वदीं ॥४५॥

पयः कणान्याचते जलधरं पिपासया ॥ सोऽपि पूरयति विश्वमंभसा हंत हंत महतामुदारता ॥ १ ॥ २ ॥ यत्नादुपा
यसिध्यर्थात् साक्षाल्लाभः फलस्य च ॥ निध्यंजनौषधीमूलं खनतां साधितो निधिः ॥ फलोपायसिध्यर्थो यत्न
स्तथ्येऽप्युपायसिद्धिमनपेक्ष्य साक्षात्फलस्यैव लाभोऽपि प्रहर्षणं ॥ यथा निध्यंजनसिध्यर्थं मूलिकां खनतस्त
त्रैव निधेर्लाभः ॥ यथा वा ॥ उच्चिनु प्रथममवधिस्थितं मुग्धाक्षि पुष्पौघमाश्रितविटपं गृहीतुकामा ॥ आरोढुंप
दमदधा दशोकयष्ट्यां सा मूले पुनरपि तेन पुष्पिताभूत् ॥ अत्र पुष्पग्रहणोपायभूतारोहणसिध्यर्थ
सदनिधानात्तत्रैव पुष्पग्रहणलाभः ॥ इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनं ॥ दीपमुद्योजयेद्यावन्निर्वा
णस्तावद्देवसः ॥ यथा वा ॥ रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पंकजश्रीः ॥
इत्थं विचिंतयति कोशगते द्विरेफे हा हंत हंत नलिनीं गज उज्जहार ॥ १ ॥ एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य
तौ यदि ॥ अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी ॥ काठिन्यं कुचयोः स्रष्टुर्वांछंत्यः पादपद्मयोः ॥ निंद
ति स्म विधातारं त्वद्धाटीष्वरियोषितः ॥ तद्भाग्यं धनस्यैव यत्राश्रयति सज्जनं ॥ लाभो यमेव भूपालसेवका
नां न चेद्धनः ॥ यत्रकस्यचिद्गुणेनान्यस्य गुणो दोषेण दोषो गुणेन दोषो दोषेण गुणो वा वर्ण्यते स उल्लासः ॥
द्वितीयाद्यर्धमाद्यस्योदाहरणं ॥ तत्र पतिव्रतामहिमगुणेन तदीयस्नानतो गंगायाः पावनत्वगुणो वर्णितः ॥
द्वितीयश्लोके द्वितीयस्योदाहरणं ॥ तत्रारातिवधात्वदरीषु वने पलायमानानामरातियोषितां पादयोर्वन
परिपंथिमार्दवदोषेण तयोः काठिन्यमसृष्टवाय्यर्थं कुचयोस्तत्सृष्टवतो धातुर्निंद्यत्वं दोषो वर्णितः ॥ तृ
तीयश्लोके तृतीयचतुर्थयोरुदाहरणं ॥ तत्र सज्जनमहिमगुणेन धनस्य तदनाश्रयणं दोषत्वेन ॥ राज्ञः

यैः॥ इत्याद्युदाहरणेषु लेशस्यैव तु॥ तत्र हि दुर्लक्ष्मादीनां धवलीकरणाभावदोष एव गुणत्वेन न पर्यवस्यति॥
किं तु परिसंख्यारूपेण ततोऽन्यत्सर्वं धवलितमिति स्वल्पोऽपि गुणः प्रतीयते॥ कुविद्याजस्तुत्युदाहरणे गुणदोषीकर
णसत्वेपि स्तुते र्विषयांतरमपि दृश्यते॥ यथा सर्वदा सर्वदोऽसीति मिथ्या त्वं कथ्यसे बुधैः॥ नारयो लेभिरे पृ
ष्ठं न वक्षः परयोषितः॥ अत्र हि वाच्यया भंग्या परिसंख्यारूपेण ततोऽन्यत्सर्वमर्थिनामभिमतं दीयत इति
स्तुत्यंतरमपि प्रतीयते॥ एवं च एतदुदाहरणेषु कस्ते शौर्यमदो योद्धुमित्यादिषु गुणदोषादिषु गुणदोषीकर
णादिकमेव व्याजस्तुतिरूपतयावतिष्ठते॥ अत्र लेशव्याजस्तुत्योः संकरोऽस्तु इत्थमेव हि व्याजस्तुत्यप्रस्तु
तप्रशंसयोरपि प्राक्संकरो वर्णितः॥ सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः॥ नितंबगुर्वी तरुणी दृग्युग्म दृ
विपुला च सा॥ १७॥ अत्र नायिकावर्णनपरेण युग्मविपुलापदेनास्यानुष्टुभो युग्मविपुला नामेत्स्वरूपसू कृ
च्यार्थसूचनं मुद्रा यद्यप्यत्र यथेतन्नाम्नो नास्ति सूचनीयत्वं तथाप्यस्योत्तरार्धस्य लक्ष्यलक्षणयुक्तत्वे
दः शास्त्रे मध्यपतितत्वेन तस्य सूचनीयत्वमस्तीति तदभिप्रायेण लक्ष्यं योज्यं॥ एवं नवरत्नमालायां सू
चनीयत्तद्रत्ननामनिवेशनेन तत्तन्नामकजातिसूचनं॥ नक्षत्रमालायां अश्व्यादिदेवतानामभिर्नक्षत्रसू
चनमित्याद्यवयमेवालंकारः॥ एवं नाटके वक्ष्यमाणार्थसूचनेऽपि॥ क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं
विदुः॥ चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते॥ १८॥ अत्र चतुरास्यादिपदैर्वर्णनीयस्य ब्रह्मरुद्रविष्णु
ता प्रतीयत इति प्रसिद्धसहपाठानां ब्रह्मादीनां क्रमेण निवेशनं रत्नावली॥ यथा वा॥ रसायां प्रियेलो
छने कठिनतावासो रसालिंगिते प्रल्हादैकरसे क्रमादुपचिते भूभृत्तगुरुत्वापहे॥ कोकस्यापि निभोगभा

कुवल०
॥४९॥

जितजनितानंगेरवलीनो मुखे भाति श्रीरमणावतारदशांकं बाले भवत्यास्तने ॥१॥ यथावा ॥ नीलाब्जा
नां नयनयुगलद्राघिमादत्तपत्रं कुंभावेभौ कुचपरिकरः पूर्वपक्षीचकार ॥ भ्रूविभ्रांतिर्मदनधनुषो वि
भ्रमानन्चवादी दृक्कोज्योत्स्नां राराधरत्वं दूषयामास यस्याः ॥ अत्रपत्रदानपूर्वपक्षोपन्यासानुवाददूष
णोद्भावनानि बुधतेन प्रसिद्धक्रमेण न्यस्तानि ॥ प्रसिद्धसहपाठानां प्रसिद्धक्रमान
नुसारेणाप्ययमेवालंकारः ॥ यथा ॥ यस्य वन्हिमयो हृदयेषु जलमयो
लोचनपुटेषु मारुतमयः श्वासितेषु क्ष्मामयो गेषु आकाशमयः स्वांतेषु पंचमहाभूतमयो मूर्त इवाद्दृश्य
तनिहतप्रतिसामंतांतःपुरेषु प्रतापः ॥ एवमष्टलोकपालनवग्रहादीनां प्रसिद्धसहपाठानां यथाकथंचिद्व
र्णितोपमानोप रंजकतादिप्रकारेण निवेशनेरत्नावल्यलंकारः ॥ प्रकृतान्वये विनाक्रमिकतत्तन्नाम
श्लेषभंग्या निवेशनेप्ययमेवालंकारः ॥
तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ॥ पद्मरागायते नासामौक्तिकं ते धररत्विषा ॥ यथावा ॥ वीरत्वद्रिपुर
मणीपरिधातुं पल्लवानि संस्पृशंत्य ॥ न हरंति वनभुवि निजकरस्रुहरुधिरखचितानि पांडुपत्रधिया ॥ पुनः स्व
गुणसंप्राप्तिः पूर्वरूपमुदाहृतं ॥ हरकंठांशुनीलोपि शेषस्वद्यशसासितः ॥ यथावा ॥ विभिन्नवर्णा गरु
डाग्रजेन सूर्यस्य रथ्याः परितः स्फुरंत्या ॥ रत्नैः पुनर्यत्र रुचं रुचा स्वामानिन्यिरे वंशकरीरनीलैः ॥ अयमे ॥शिव॥
व तद्गुणा इति केचिद्व्यवजहुः ॥ पूर्वावस्थानुवृत्तिश्चवि तेसतिवस्तुनि ॥ दीपेनिर्वापितेप्यासीत्कांचीरत्नै ॥४९॥
र्महन्महः ॥ लक्षणेनकारात्पूर्वरूपमिति लक्ष्यवाचकपदानुवृत्तिः ॥ हारं रवं द्विगिभिराहतं वहिरपि

व कृ यथावा

कुवल० ॥४७॥ याश्चरणो सहजारुणो ॥ यथा वा ॥ मल्लिकामा[illegible]ल्यभारिण्यः सर्वांगीणार्द्रचंदनाः ॥ क्षौमवत्यो न लक्ष्यंते ज्यो
त्स्नायामभिसारिकाः ॥ अत्राद्ये चरणे लक्तकरसस्य रक्तिमगुणसाम्याद्भेदानध्यवसायः ॥ द्वितीयोदाहर
णे चंद्रिकाभिरभिसारिकाणां धवलिमगुणसाम्याद्भेदानध्यवसायः ॥ सामान्यं यदि सादृश्याद्विशेषो नोप
लक्ष्यते ॥ पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवां ॥ यथा वा ॥ रत्नस्तंभेषु संक्रांतैः प्रतिबिंबशतैर्वृतः ॥ लंकेश्व
लि५ रः सभामध्ये न ज्ञातो [illegible] वस्तुना ॥ मीलितालंकारे एकेनापरस्य भिन्नस्वरूपानवभासरूपं मीलनं क्रियते ॥ पि
सामान्यालंकारे तु भिन्नस्वरूपावभासेपि व्यावर्तकविशेषो नोपलक्ष्यत इति भेदः ॥ मीलितोदाहरणे चर हि
प्र णादे[illegible] वस्त्वंतर्विभागे तु कयावका[illegible] नभासते ॥ सामान्योदाहरणे तु पद्मानां मुखानां
च व्यक्त्यंतरतया भानमस्त्येव ॥ तथा रावणादेः स्वप्रतिबिंबानां च किंचिद्दर्पणमिदं मुखमयं बिंबोयं
प्रतिबिंब इति विशेषः परं नोपलक्ष्यते ॥ अत एव भेदतिरोधानान्न मीलितं तदतिरोधानेपि सामान्य
मान्य न व्यावर्तकानवभासे[illegible] मिथः स्फुरणयोरप्यनर्थता ॥ केचित्तु वस्तुद्वयस्य लक्षणसाम्यात्तयोः केन
चिदेकीयसात्तदन्यस्य स्वरूपतिरोधाने मीलितं ॥ [illegible] स्वरूपप्रतीतावपि गुणसाम्याद्भेदतिरोधाने सा
मान्यं ॥ एवं च ॥ अपांगतरले दृशौ तरलवक्रवर्णा गिरो विलासभरमंथरा गतिरतीव कांतं मुखं ॥ इति स्फु
रितमंगके मृगदृशां स्वतो लीलया तदत्र न मदोदयः कृतपदोपि संलक्ष्यते ॥ १ ॥ इत्यत्र मीलितालंकारः अत्र
हि तारल्यादीनां नारीवपुषः सहजधर्मत्वान्मदोदयकार्यत्वाच्च ॥ तदुभयसाधारण्याद्युत्कृष्टतारल्यादि ॥शिव॥
योगिना वपुषा मदोदयस्य स्वरूपमेव ति[illegible]रोधीयते ॥ लिंगसाधारण्येपि ननु दृष्ट्वानो [illegible] यो भावात् मल्लिका ॥४७॥
दृ पी

माल्यभारिण्य इत्यादिषु तु सामान्यालंकार इत्याहुः ॥ तन्मते पद्माकरप्रविष्टानामित्यादौ भेदाध्यवसायेः
पि व्यावर्तकास्फुरणे नालंकारांतरेण भाव्यं ॥ सामान्यालंकारावांतरभेदेन वा पूर्वस्मिन्मते स्वरूपतिरोधानेन ना
लंकारांतरेण भाव्यं मीलितावांतरभेदेन वा ॥ भेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषकौ ॥ हिमाद्रिं त्वद्यशो
मग्नं सुराः शीतेन जानते ॥ लक्षितान्युदिते चंद्रे पद्मानि च मुखानि च ॥ मीलितन्यायेन भेदानध्यवसाये प्रा
सि कुतोपि हेतोर्भेदस्फूर्तौ मीलितप्रतिद्वंद्वी उन्मीलितं ॥ तथा सामान्यरीत्यापि विशेषास्फुरणे प्राप्ते कुतश्चि
त्कारणाद्विशेषस्फूर्तौ तत्प्रतिद्वंद्वी विशेषकः ॥ क्रमेणोदाहरणद्वयं ॥ तद्रूपरीत्यापि भेदानध्यवसाये प्र
यथा० सौ चुन्मीलितं दृश्यते ॥ [illegible] गौड हासप्रसरसहचरैस्तावकीनैर्यशोभिर्धावल्यं नीयमाने त्रिजगति
परितः श्रीनृसिंहक्षितींद्र ॥ [illegible] नाभीकमलपरिमलप्रौढिमासादयिष्यद्देवानां नाभविष्यत्क
थमपि कमलाकामुकस्यावबोधः ॥ काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ॥ वसंतकाले संप्राप्ते का
कः काकः पिकः पिकः ॥ इदं विशेषकस्योदाहरणांतरं ॥ अत्र द्वितीयैका कपिका राज्ञो काकत्वेन ज्ञातः ॥
पिकत्वेन ज्ञात इत्यर्थांतरसंक्रमितवाच्यो ॥ यथा वा ॥ वाराणसीवासवतां जनानां साधारणे शंकरलांछ
नेपि ॥ पार्थक्यहारं वृषमुत्तमांगं प्रावीन[illegible]मीनां प्रकटीकरोति ॥ किंचिद्दाकूतसहितं स्याद्गूढोत्तरमुत्तरं ॥
यत्रासौ वेतसी पांथ तत्रेयं सुतरा सरित् ॥ सरित्तरणमार्गे पृष्ठे तं प्रति तत्कामयमाना पांथोत्तरमिदं ॥
वेतसीकुंजे स्थाप्यमित्याकूतं ॥ यथा वा ॥ ग्रामेस्मिन्प्रस्तरप्राये न किंचित्पांथ विद्यते ॥ पयोधरोन्नति
ब दृष्ट्वा वस्तुमिच्छसि चेद्वस ॥ अविदग्धजनप्रायेस्मिन्ग्रामे कश्चिदिदमवगमिष्यतीत्येतादृशं प्रति बंधकं
व ॥

कुवल०
॥४८॥

किंचिदपि नास्तीति हृदयं ॥ इदमुन्नेयप्रश्नोत्तरोदाहरणं ॥ निबद्धप्रश्नोत्तरं यथा ॥ कुशलं तस्या जीवति कुश
लं पृच्छामि जीवतीत्युक्तं ॥ पुनरपि तदेव कथयसि मृतां नु कथयामि या श्वसिति ॥ ईर्ष्याभिमानानंतरमनुतप्ता
या नायिकायाः सखीमागतां प्रति तस्याः कुशलमिति नायकस्य प्रश्नः ॥ जीवतीति तस्या उत्तरं ॥ जीवत्याः
कुशलं कुत इति तदभिप्रायः ॥ अन्यत्पृष्टमन्यदुत्तरमिति नायकस्य पुनः कुशलं पृच्छामीति प्रश्नः ॥ पृष्ट
स्योत्तरमुक्तमित्यभिप्रायेण जीवतीत्युक्तमिति सख्या वचनं ॥ सखीवचनस्याभिप्रायो दुरूहतया पुनरपि
तदेव कथयसीति नायकस्याक्षेपः ॥ मृतां नु कथयामि या श्वसितीति सख्याभिप्रायोद्घाटनं ॥ सति मरणो
तस्याः कुशलं भवति मदागमनसमयेपि श्वासेषु संचरत्सु कथं तां मृतां कथये इत्यभिप्रायः ॥
प्रश्नोत्तरांतराभिन्नमुत्तरं चित्रमुच्यते ॥ केदारपोषणरताः के खेटाः किं वलं वरं ॥ अत्र केदारपोषणर
ता इति प्रश्नाभिन्नमुत्तरं ॥ के खेटाः किं वलं [illegible]ति प्रश्नद्वयस्यैवमेकमुत्तरं [illegible]दाहरणांतराणि विद
ग्धमुखमंडने द्रष्टव्यानि ॥ सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितं ॥ मयि प[illegible]सा केशैः सीमंतमणिमा
वृणोत् ॥ कामुकस्यावलोकनेन संकेतकालप्रश्नभावं ज्ञात्वा तस्याश्चेष्टेयं ॥ अस्तं [illegible]ये संकेतकाल इत्याकू
तं ॥ यथा वा ॥ संकेतकालमनसं विटं ज्ञात्वा विदग्धया ॥ आसीन्नेत्रार्पिताकूतं लीलापद्मं निमीलितं ॥ पि
हितं परवृत्तांतं ज्ञातुः साकूतचेष्टितं ॥ प्रिये समागते प्रातः कांता तल्पमकल्पयत् ॥ रात्रौ सपत्नीगृहे
जागरणेन श्रांतोसीति तल्पकल्पना कृतं ॥ यथा वा ॥ वक्त्रस्यंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि ॥श्रीव॥
कंठे ॥ पुंस्त्वं तन्व्या व्यंजयंतीव यस्या स्मित्वा पाणौ खड्गरेखां लिलेख ॥ अत्र स्वेदानुमितं पुरुषायितं पुरुषो ॥४८॥

प्रस्विन्नांगः ३ ॥ गजेरंतः कंचुकिभिः स्फुरन्मणिधरैरध्यासिता भूमयः ॥ आक्रांतं महिषीभिरेव शयनं त्वद्वि
द्विषां मंदिरे राजन् सैव चिरंतनप्रणयिनी शून्येपि राज्यस्थितिः ॥ संगतान्यगुणानंगीकारमाहुरतद्गुणं ॥
चिरं रागिणि मच्चित्ते निहितोपि न रज्यसि ॥ यथा वा ॥ गांगेंभोभिर्विहरति मदैः पिच्छिले दिग्गजानां वैरिस्त्रीणां
नयनकमले खंजनानि प्रमार्ष्टि ॥ यद्यप्येषा हिमकरकरादंतसौवस्तिकी ते कीर्तिर्दिक्षु स्फुरति तदपि श्रीनृ
सिंहक्षितींद्र ॥ ४ ॥ ननु चान्यगुणेनान्यत्र गुणोदयानुदयरूपाभ्यामुल्लासावज्ञालंकाराभ्यां तद्गुणातद्गुणा
योः को भेदः ॥ उच्यते ॥ उल्लासावज्ञालक्षणयोर्गुणशब्दो दोषप्रतिपक्षवाची ॥ अन्यगुणेनान्यत्र गुणोदय
तदनुदयौ च न तस्यैव [illegible] गुणस्य संक्रमणासंक्रमणे ॥ किंतु सदृक्रूपदर्शने सदसद्विषययोर्ज्ञानोत्पत्त्य
नुत्पत्तिवत् तद्गुणजन्यत्वेन संभावितयोर्गुणांतरयोरुत्पत्त्यनुत्पत्ती ॥ तद्गुणातद्गुणयोः पुनर्गुणशब्दो रूप
रसगंधादिगुणवाची ॥ तत्रान्यदीयगुणग्रहणाग्रहणे च रक्तस्फटिकवैरस्यमालिन्यादिन्यायेनान्यदीयगु
णमेवानुरंजनाननुरंजने विवक्षिते ॥ तथैवोदाहरणानि दर्शितानि ॥ यद्यप्यवज्ञालंकृतिरतद्गुणश्च विशे
षोक्तिविशेषावेव कार्याजननविशेषोक्तिः सति पुष्कलकारण इति तत्सामान्यलक्षणाक्रांतत्वात् ॥ तथा
पि उल्लासतद्गुणप्रतिद्वंद्वितया विशेषाकारेणालंकारांतरतया परिगणितावित्यध्येयं ॥ प्राक्सिद्धस्वगुणो
त्कर्षो नुगुणः परसंनिधेः ॥ नीलोत्पलानि दधते कटाक्षैरतिनीलतां ॥ यथा वा ॥ कपिरपि च कापिशायि
नमदमत्तो वृश्चिकेन संदष्टः ॥ अपि च पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य ॥ अत्र कपित्वजात्या स्वतःसि
द्धस्य वैकृतस्य मद्यादिभिरुत्कर्षः ॥ मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते ॥ रसो नालक्षि लाक्षा

वितखड्गलेखनेन प्रकाशितं ॥ व्याजोक्तिः हेतूक्त्या पदाकारस्य गोपनं ॥ सखि पश्य गृहारामपरागैरस्मि
धूसरा ॥ अत्र चौर्यरतकृतसंकेतभूपृष्ठलुठनलग्नधूलिजालस्य गोपनं ॥ यथा वा ॥ कस्य वा न भवेद्रोषः प्रि
यायाः सव्रणेऽधरे ॥ सभृंगं पद्ममाघ्रासीर्वारितापि मयाधुना ॥ उपपतिना खंडिताधराया नायिकायाः सका
शमागच्छंतं प्रियं मपश्यंस्येव सख्या नायिकां प्रति हितोपदेशव्याजेन तं प्रति नायिकापराधगोपनं ॥ छेका
पह्नुतेरस्याश्चायं विशेषः ॥ तस्यां वचनस्यान्यथानयनेनापह्नवः ॥ अस्यामाकारस्य हेत्वंतरवर्णनेन गोपन
मिति ॥ लक्षणे लक्ष्ये चाभिन्नचोक्तिग्रहणमाकारस्य गोपनार्थं हेत्वंतरप्रस्तायकव्यापारमात्रोपलक्षणं ॥ त
तश्च ॥ आयांतमालोक्य हरिं प्रतोल्यामालयाः पुरस्तादनुरागमेका ॥ रोमांचकंपादिभिरुच्यमानं भामा जुगू
ह प्रणमंत्यथैनमित्यत्रापि व्याजोक्तिरेव ॥ तत्र ह्यनुरागकृतस्य रोमांचाद्याकारस्य भक्तिरूपहेत्वंतरप्रस्ता
यकेन प्रणामेन गोपनं कृतं ॥ सूक्ष्मपिहितालंकारयोरपि चेष्टितग्रहणमुक्तिसाधारणव्यापारमात्रोपल
क्षणं ॥ तलश्च ॥ नलिनीदले बलाकामर्कतपात्र इव दृश्यते शुक्तिः ॥ इति मम संकेतभुवि ह्रात्वा भावं तदाब्रवीदा
लिभित्यादिष्वपि सूक्ष्मोलंकारः प्रसरति ॥ अत्र श्लोके तावत्किमावयोः संकेतस्थानं भविष्यतीति प्रश्नाशयं सख
यतिष्ठकामुके तदभिनयाविदग्धया तदासखी प्रति साकूतमुक्तमिति ॥ सूक्ष्मालंकारो भवति ॥ यतोत्र बलाका
धामकेरतपात्रप्रतिष्ठितशंखशुक्त्युपमया तस्या निश्चलत्वेन आश्वस्तत्वं तेन तस्य प्रदेशस्य निर्जनत्वं तेन तदेवा
वयोः संकेतस्थानमिति कामुकं प्रति सूचनं चैव लक्ष्यते ॥ न चात्र ध्वनिशंकनीयो दूरे व्यंग्यमानस्यापि संके ष्य
तस्थानप्रश्नोत्तरस्य स्वोक्त्यैव विस्पष्टत्वात् ॥ एवं पिहितालंकारेप्युदाहार्यं ॥ वक्रस्यंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वा भि

कुवल० न्नं कुकुमं कापि कंठे आलीबालं [illegible] सस्मितं प्राह मंदं मुग्धाक्षि त्वामयं पश्याभिनाथमित्यादि। इदं वाच्यं तत्रावधेयं॥ द
॥४९॥ यत्रासौ वेतसी पांथेत्यादिषु गूढोत्तरस्तु क्ष्मपिहितत्वाज्जोत्स्युदाहरणेषु भावो [illegible] नस्वोक्त्या विवृतः॥ किंतु वस्तु
सौंदर्यबलादूह्यो [illegible] द्व्यर्थविशेषविशेषिताद्व्यर्थः॥ तत्र [illegible] वस्तुतो नालंकारत्वं॥ ध्वनिभावास्पदत्वात्॥ प्राचीनैः॥
स्वोक्त्या विवृतेस्त्यलंकारस्य दत्तत्वात्पुदाहृतत्वाद्स्माभिरप्युदाहृतानि॥ न्नाक्यं हि यत्रासौ वेतसीपांथ
तू तत्रेयं सुतरां सरि[illegible]ति प्रच्छन्नतमध्याने कामिन्यो हसीसूचनमित्याद्यर्थोत्तरकल्पना॥ या भावाविष्करणमित्यत्र:
वुये प्राग्लिखितेषु ष्टदाहरणेषु संकेतकालमनसं पुस्तं तन्व्या व्यंजयंती॥ भामा जुगृहेति भावाविष्करणमस्तितेष्वन
तत्तदलंकार इति॥ गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते॥ वृषापेहि परक्षेत्राद्यातिक्षेत्ररक्षकः॥
यं प्रति किंचिद्वक्तव्यं तत्तटस्थे मा ज्ञासीदिति तदेवेतरदन्यं कंचित् प्रति श्लेषेणोच्यते सा गूढोक्तिः॥ वृषेत्याद्युदा
हरणं॥ इह परकलत्रमुपभुंजानं कामुकं प्रति वक्तव्यं॥ परक्षेत्रे सस्यानि भक्षयंतं कंचिद् क्षाणं समीपे चरंतं
ता निर्दिश्य कथ्यते॥ नेयमप्रस्तुतप्रशंसा॥ कार्यकारणादिव्यंग्यत्वाभावात्॥ नापि श्लेषमात्रमप्रकृतार्थ
स्याप्रकृतार्थविवक्षितत्वात्॥ तस्य केवलमितरवंचनार्थनिर्दिष्टतया विच्छित्तिविशेषसद्भावात्॥
यथा वा॥ नाथो मे विपणिं गतो न गणयत्येषा सपत्नी च मां स्वक्षुमामिहपुष्पिणीति गुरवः प्रागेव गेहाभ्यं
तरे॥ शय्यामात्रसहायिनी परिजनः श्रांतो न मां सेवते स्वामिन्नागमनेन लोलनीयरजनीलक्ष्मीपते रक्ष मां॥ अ
त्र लक्ष्मीपतिनाम्नो जारस्यागमनं प्रार्थयमाना यास्तत्रस्थजनवंचनाय भगवंतं प्रत्याक्रोशस्य प्रत्यायनं ॥श्रीवा॥
विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि॥ वृषापेहि परक्षेत्रादिति वक्ति ससूचनं॥ ॥श्लेषगुप्तं वस्तु ॥४९॥

कुवल॰ इ ॥५०॥ प्र

अत्र तावदीर्ष्या[illegible]कलुषितदयिताप्रसादनव्यापारविधित्सेति प्रतीयते॥ दृष्टिरोगातं स्य दृष्टिं प्रसाक्को
ऽपि वञ्चिताथः सवदृष्टेस्यस्य पदस्य कारणेन सबुधिरूपतामवगमय्याविष्कृतः॥ कविनिबद्धवक्तृगुप्तं
परवंचनार्थं॥ कविगुप्तं स्वप्रौढिकटनार्थमिति भेदः॥ युक्तिः परातिसंधानं क्रियया मर्मगुप्तये॥ त्वामालिखं
ती दृष्ट्वा[illegible]न्यं धनुः पौष्पं करे लिखत्॥ अत्र पुष्पचापलेखनक्रियया मन्मथो नया लिखित इति भ्रान्त्युत्पादने
न स्वानुरागरूपममप्रकाशनायपरवंचनं [illegible]कृतं॥ यथा वा॥ दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं य
द्वचस्तत्प्रातर्गुरुसन्निधौ निगदतस्तस्यातिमात्रं वधूः॥ कर्णालंबितपद्मरागशकलं विन्यस्य चंचूपुटे
व्रीडार्ता विदधाति दाडिमफलव्याजेन वाग्बंधनं॥ अत्र शुकवाक्प्रवृत्तेर्यान्निमुखेनस्वकीयरहस्यनिर्वचनशु
श्रूषुजनवंचनं कृतं॥ व्याजोक्त्या[illegible]काकारगोपनं युक्तौ तदन्यगोपनमिति भेदः॥ यद्वा व्याजोक्तावुक्त्या गोपनमि
ह क्रियया गोपनमिति भेदः॥ एवं च यांत मालोक्य हरिं प्रतोल्यामिति श्लोकेपि युक्तिरेव॥ लोकप्रवादानु
कृतिर्लोकोक्तिरितिगद्यते॥ सहस्व कतिचिन्मासान्मीलयित्वा विलोचने॥ अत्र लोचने मीलयित्वेति लोकप्रवादा
नुकृतिः॥ यथा वा॥ मदीयवरदराजस्तवे॥ नामैवतेवरद वांछितदातृभावं व्याख्यात्यतो न वहसे वरदानमुद्रां
दिव्यप्रसिद्धतरविप्रकुलप्रसूतेर्यज्ञोपवीतवहनं हि न खल्वपेक्ष्यं॥ अत्रोत्तरार्धे लोकवादानुकारः॥ छेकोक्ति
र्यदि लोकोक्तेः स्यादर्थांतरगर्भिता॥ भुजंग एव जानीते भुजंगचरणं सखे॥ के न विकस्यैवतांतं पृष्टस्य स
मीपस्थमन्यं निर्दिश्य॥ यमेवत्स्य वृत्तांतं जानातीत्युक्तेरेवतायमहः पादानहिरेव जानातीति लोकवादा ॥क्षिव॥
नुकारः॥ अत्र सर्वाय लोकविदितधनार्जनादि[illegible]व्यापारसहकारिणाविदितविषयतया लोकोक्त्यनुवादस्य ॥५०॥

चै

उ

पि

प्रयोजने स्थिते रहस्येप्यनेन व्यापारेण स्यायं सहचर इति मर्मोद्घाटनमर्पिते नगभक्तृतं॥ यथा वा॥ म
ता लयमरुतां व्राता याता विकासितमल्लिकापरिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि॥ घन घटयितुं त्वं निस्ने
हं य एव निवर्तने प्रभवति गवां किन्नः छिन्नं स एव धनंजयः॥ अत्र धनलिप्सया प्रोषितं गंता सखी वचने
य एव गवां निवर्तने प्रभवति स एव धनंजयः इत्यौ धनंजयप्रसिद्ध लोकवादानुकारः॥ अत्रातिस्रोदयस्य
लिनीद्रुमामपहाय धनलिप्सया प्रस्थितोरसानेसद्भूतिगोप्ता यएव॥ तस्यनिवर्तकस्तुधनस्यजेताधुने भि
नान्यकृतस्यतद्विमुखीकरणप्रसादकत्वादित्यर्थांतरमपिगर्भितं॥ वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्र क्ष
कल्पनं॥ मुंच मानं दिनं प्राप्तं नेह नंदी हरांतिके॥ अत्र मानं मुंच प्रभाता रात्रिरिति सख्योक्तो यांवाहिने
दिनं प्राप्तं मा मुंचेत्यर्थांतरं श्लेषेण परिकल्पितं॥ यथा वा॥ अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता॥ त्रि
गुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥ इदमविकृतश्लेषवक्रोक्तेरुदाहरणं॥ विकृतश्लेषवक्रोक्तेर्यथा॥
भवित्री रंभोरु त्रिदशवदनग्लानिरधुना स मे रामः स्थाता न युधि पुरतो लक्ष्मणसखः॥ इयं यास्यत्युच्चैर्विप
दमधुना वानरचमूर्लघिष्ठेदं षष्ठाक्षरपरिविलोपात् पठ पुनः॥ १॥ सर्वमिदं श्लेषमूला या वक्रोक्तेरुदा
हरणं॥ अश्लेषमूला यथा॥ भिक्षार्थं स क्व यातः सुतनु बलिमखे ताडवं क्वाद्य भद्रे मन्ये वृंदावनांते क्व
नु स मृगशिशुर्नैव जाने वराहं॥ बाले कच्चिन्न दृष्टो जठरं वृषपतिर्गोप एवास्य वेत्ता लीलासंलाप इत्थं
जलधिहिमवतोः कन्ययोस्त्रायतां नः॥ १॥ काकुर्यथा॥ असमालोच्य कोपस्ते नोचितोयमिति स्थिता॥ नैवो
चितोयमिति तं ताडयंमासमालया॥ अत्र नैवोचितमिति काकु[illegible]स्वरविकारेण [illegible]चितएवेत्यर्थांतरकल्प

कुवल० नं॥ ॥स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं॥ कुरंगैरुत्तरंगाक्षैः स्तब्धकर्णैरुदीक्ष्यते॥ यथा वा॥ लो
॥५१॥ सं मुखप्रचलितौ सविधे गुरूणां मार्गप्रदानरभसस्खलितावधानौ॥ पार्श्वोपसर्पणमुभावपि भिन्नदिक्कं क
ला मुहुर्मुहुरुपासरतां सलज्जं॥ ॥भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं॥ अहं विलोकयेद्यापि युध्यंते
त्र सुरासुराः॥ ॥स्थानमीषणलोद्भुवनपरमिदं॥ यथा वा॥ अद्यापि तिष्ठति दृशोरिदमुत्तरीयं धर्तुं पुर
स्तनतटात्पतितं प्रवृत्ते॥ वाचं निशम्य नयनं नयनं ममेति किंचिन्नदायदकृता स्मितमायताक्ष्याः॥ उदात्तमृद्धेः
श्चरितं श्लाघ्यं चान्योपलक्षणं॥ सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः॥ उदं श्लाघ्यचरितस्यान्यांगत्वेनोदाहर
णं॥ ऋद्ध्युदाहरणं यथा॥ रत्नस्तंभेषु संक्रांतैः प्रतिबिंबशतैर्वृतः॥ ज्ञातो लंकेश्वरः कृच्छ्रादांजनेयेन तत्त्वतः॥
अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनं॥ त्वयि दातरि राजेंद्र याचकाः कल्पशाखिनः॥ इयमौदार्यात्युक्तिः॥
शौर्यात्युक्तिर्यथा॥ राजन्सप्ताप्यकूपारास्त्वत्प्रतापाग्निशोषिताः॥ त्वद्वैरिराजवनिताबाष्पपूरेण पूरिताः॥
संपदत्युक्तावुदात्तालंकारः॥ शौर्यात्युक्तावत्युक्त्यलंकार इति भेदमाहुः॥ अनयोरनवयोगिस्तनयोर्जृंभ
माणयोः॥ अवकाशो न पर्याप्तस्तव बाहुलतांतरे॥ अत्यंतं निर्मितमाकाशमनालोच्यैव वेधसा॥ इदमेवं
विधं भाविभवसाः स्तनमंडलमिति [illegible] सदुक्तिनारतम्येनातिशयात्कस्यो भेदः॥ निरुक्तिर्योगतो ना
म्नामन्यार्थत्वप्रकल्पनं॥ ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्॥ यथा वा पुरा कवीनां गणनाप्रसंगे क
निष्ठिकाधिष्ठितकालिदासा॥ अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव॥ प्रतिषेधः प्रसिद्ध ॥शिव॥
स्य निषेधस्यानुकीर्तनं॥ न द्यूतमेतत्कितव क्रीडनं निशितैः शरैः॥ सिद्धस्य निषेधस्यानुपयुक्तत्वादर्थांत ॥५१॥

यथा कथंचित्कविना विवृतं चेद्विवृतोक्तिः॥ ॥वृषापेहि स्कराहरणो पूर्ववद्भुसंवस्त्र ससूचनमिति कविना विवृतं॥
यथा वा॥ वत्से मा गा विषादं श्वसनमुरुजवं संत्यजोर्ध्वप्रवृत्तं कंपः को वा गुरुस्ते किमिह बलभिदा जृंभितेनात्र
याहि॥ प्रत्याख्यानं सुराणामिति भयशमनं छद्मना कारयित्वा यस्मै लक्ष्मीमदाद्वः स दहतु दुरितं मंथमुग्धां पयोधिः॥ ग्ध: २
धिः॥ १॥ इदं परवंचनाय गुप्तस्याविष्करणं॥ स्वगुप्तस्याविष्करणं यथा॥ दृष्ट्या केशवगोपरागहृतया किंचिन्न दृ
ष्टं मया तेनेह स्खलिता स्मि नाथ पतितां किं नाम नालंबसे॥ एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिर्गो
प्येवं गदितः सलेशमवताद्गोष्ठे हरिर्नश्चिरं॥ अत्र रूपमात्मपुरतो विषमे पथि स्खलनमभिहितवत्यास्तत्का
मयमानाया गोपिकायाः वचने विषमपथिस्खलनपतनत्राणप्रार्थनारूपेण झटिति प्रतीयमानार्थेन गु
सं विवक्षितं गुप्तार्थांतरं गुप्तं सलेशं ससूचनमित्यनेनाविष्कृतं॥ एवं नैषधादिषु चेतो नलं कामयते मदीयं ना ॥ सर्वमि
न्यत्र कुत्रापि च साभिलाषमिति दमयंती वाक्यादिकमप्युदाहरणं॥ ईदृशाच्छ्रुतश्लेषोक्तिकोटीकृतगुप्तार्थाविष्करणे ॥ त्वै
अर्थश्लेषोक्तिमूलगुप्तार्थाविष्करणं यथा॥ गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते किं त्वेवं विजनस्थ
योर्हतजनः संभावयत्यन्यथा॥ इत्यामंत्रणभंगिसूचितवृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्करांचित
ततनुर्गोपीं हरिः पातु वः॥ २॥ अत्र गच्छाम्यमंत्रणोक्त्या रंतुं [illegible] मेतावत्कालं स्थितं तन्निष्फलमभिमत्य न
श्लेषोक्तिलभ्यं वस्तु तत्तनीयपादेनाविष्कृतं॥ सर्वमेतत्कविनिबद्धवक्तृगुप्तार्थाविष्करणोदाहरणं॥ कविगुप्ताविष्करणं यथा॥
ष्करणं यथा॥ सुभ्रु त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषितां दूरादेव विवर्जिताः सुरभयः स्रग्गन्ध
धूपादयः॥ कोपं रागिणि मुंच मय्यवनते दृष्टे प्रसीदाधुना सत्यं त्वद्विरहाद्भवंति दयिते सर्वा ममांधा दिशः॥
च्युतेसाद्या

रंगभंगं करोतीति तेनस्वारूपतादिवतेयं प्रतिषेधनामालंकारः ॥ उदाहरणं ॥ युध्यरंगे प्रत्यवतिष्ठमानं त्वां कुनिंप्र
तिविदाधवचनं तत्र युध्यस्य-वाक्षद्यूतत्वाभावो विज्ञात एव कीर्त्यमानस्तथैव तत्र प्रागल्भ्यं न युधेत्वसुभृ
ग्रहोस्तीत्युपहासं रंगभंगं करोति ॥ तद्यं कितवेत्यनेन नाविष्कृतं ॥ यथा वा ॥ नोविषेण न शस्त्रेणाग्निना न व
म्रत्यकृता ॥ अप्रतीकाररूपाः स्त्रीभिरेव स्त्रियः कृताः ॥ अत्र स्त्रीणां विषादिनिर्मितत्वाभावः प्रसिद्ध
एव कीर्त्यमानस्तासां विषायतित्वाय्यिक्रीयमिति अमुमर्थं व्यक्तीकरो[ति] निसवाप्रतीकाररूपाकृष्य इति प्रती
कारवज्र्यो विषादिभ्यस्तासां विशेषं दर्शयता विशेषणेनाविष्कृतः ॥ सिद्धस्यैव विधानं यत्तदाहुर्विध्यलं
कृतिं ॥ पंचमोदंचने काले कोकिलः कोकिलो भवेत् ॥ निष्कृतिविधानमनुपपुक्तिबाधितं सदर्थांतरग
भंगकरणेन चारुत्वरमिति तं विधिनामालंकारमाहुः ॥ उदाहरणे कोकिलस्य कोकिलत्वविधानमनुपयु
क्तं सदतिमधुरपंचमध्वनिरूपालितया सकलजनहृदयत्वंगभंगं करोति ॥ तच्च पंचमोदंचने काले इति विशे
षणेनाविष्कृतं ॥ यथा वा ॥ रे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणं ॥ राम
स्य गात्रमसि निर्भरगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते ॥ अत्र रामस्य स्वहस्तं प्रति रामस्य गा
त्रमसीति वचनमनुपयुक्तं सद्रामस्यात्यनेनस्वस्यां संतनिष्ठुरत्वं गंभंगं करोति तच्च निर्भरेत्यादिविशेष
णेनाविष्कृतं ॥ यद्यप्यनयोर्विधिनिषेधयोरुदाहरणे पुच्छंग्यान्यर्थांतरसंक्रमितवाच्यरूपाणि तथा
पि न ध्वनिभावास्पदानि ॥ स्वोक्त्यैव व्यंग्यविशेषाविष्करणात् ॥ व्यंग्याविष्करणे चालंकारत्वमेवेति प्र
कृतप्रस्तुतांकुरप्रकरणे व्यवस्थितत्वात् ॥ पूर्वं बाधितो विधिप्रतिषेधो आक्षेपभेदत्वेनोक्तौ ॥ इदं तु

प्रसिद्धौ विधिनिषेधौ तत्प्रतिद्वंद्विनावलंकारांतरत्वेन वर्णिताविति भेदः ॥ हेतोर्हेतुमता सार्धं वर्णनं हेतुरु
च्यते ॥ असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां ॥ यथा वा ॥ एष ते विद्रुमच्छायो मरुमार्ग इवाधरः ॥ क
स्य नो तनुते तन्वि पिपासाकुलितं मनः ॥ मानेनेच्छति वारयत्युपशमे क्ष्मामालिखंत्यां ह्रियां स्वातं
त्र्ये परिवृत्य तिष्ठति करौ व्याधूय धैर्यं गते ॥ तृष्णे त्वामनुबध्नता फलमियत्प्राप्तं जने नामुना
यत्स्पृष्टो न पदा स एव चरणौ स्प्रष्टुं न संमन्यते ॥ इत्युदाहरणं ॥ हेतुहेतुमतोरैक्यं हेतुं केचित्प्र
चक्षते ॥ लक्ष्मीविलासा विदुषां कटाक्षा वेंकटप्रभोः ॥ अत्र कार्यावश्यंभावतच्छैघ्र्यादिप्रत्यायनार्थं
र्थं कार्यकारणाभेदव्यपदेशः ॥ यथा वा ॥ आयुर्दानमहोत्सवस्य विनतक्षोणीभृतां मूर्तिमान्विश्वासो
नयनोत्सवो मृगदृशां कीर्तेः प्रकाशः परः ॥ आनंदः कलिताकृतिः सुमनसां वीरश्रियो जीवितं धर्म
स्यैकनिकेतनं विजयते वीरः कलिंगेश्वरः ॥ अत्र दानमहोत्सवपुष्कलत्वादिनाध्यवसितेराशितद्युक्त
दिव्यपदेशः ॥ इत्थं शतमलंकारा लक्षयित्वा निदर्शिताः ॥ प्राचामाधुनिकानां च मतान्यालोच्य सर्वतः ॥
चत्वारो रसवत्प्रेय ऊर्जस्वि च समाहितं ॥ भावस्य चोदयः संधिः शबलत्वमिति त्रयः ॥ अष्टौ प्रमाणालंका
राः प्रत्यक्षप्रमुखाः क्रमात् ॥ एवं पंचदशान्यानप्यलंकारान्विदुर्बुधाः ॥ तत्र विभावानुभावव्यभिचा
रिभिर्व्यंजितो रतिहासशोकादिश्चित्तवृत्तिविशेषो रसः स यत्र परस्यांगं भवति तत्र रसवदलंकारः ॥ ॥शिव५
विभावानुभावाभ्यां अभिव्यंजितो निर्वेदादिस्तु यस्मिंस्त्राद्रूदो देवतागुरुनृपपुत्रकलत्रादावभिव्य ॥५२॥
ज्यमाना रतिश्च भावः ॥ स यत्र परस्यांगं स प्रेयोलंकारः ॥ अनौचित्येन प्रवृत्तो रसो भावश्च रसाभा

रतिरिति अपुष्टहासादिस्थायि भावस्योपलक्षणं २ देवतेत्यादि अपरिपुष्टत्वादेरुप लक्षणं २ पुत्र २

५ भावस्य निर्वेदादिव्यभिचारिभावस्येत्यर्थः ५

कुवल० ति भावस्य तद्विषयद्विषद्दूषणस्य रतिरूपो भावाभासोऽङ्गं ॥३॥ समाहितं यथा ॥ पश्यामः किमियं प्रपद्यत
॥५३॥ इति स्थैर्यं मयालम्बितं किं मां नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ॥ इत्यन्योन्यविलक्षदृष्टिच
तुरे तस्मिन्नवस्थान्तरे सव्याजं हसितं मया धृतिहरो मुक्तस्तु बाष्पस्तया ॥ अत्र शृङ्गाररसस्य कोपप्रशान्तिर
ङ्गं ॥४॥ भावोदयो यथा ॥ तदवनिश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकिनी ॥ अदर्शि पादेन वि स
लिख्य पत्त्रिणा तवैव रूपेण समः समप्रियः ॥ अत्र नलं प्रति दमयन्त्या औत्सुक्यरूपभावस्योदयः शृङ्गा
ररसस्याङ्गं ॥ भावसन्धिर्यथा ॥ एकाभूत्कुसुमायुधेषुधिरिव प्रव्यक्तपुङ्खावली जाता मङ्गलपालिकेव पु
लकैरन्या कपोलस्थली ॥ लोलाक्षी क्षणमात्रभाविविरहक्लेशासहा पश्यतो द्रागाकर्णायतशर्वरीरभवतः
प्रोद्दाहवाडम्बरे ॥ अत्र रमणीप्रेमरणोत्सुक्ययोः सन्धिः ॥ प्रभुविषयभावस्याङ्गं ॥ भावशबलत्वं यथा ॥
क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखं ॥
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्य
ति ॥२॥ अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता विप्रलम्भशृङ्गाररस्याङ्गं ॥
॥३॥ प्रमाणालङ्कारे प्रत्यक्षं यथा ॥ कान्तकान्तवदनप्रतिबिम्बे भग्नबालसहकारसुगन्धौ ॥ स्वादुनि प्रणदि
तालिनि शीते निर्ववार मधुनीन्द्रियवर्गः ॥१॥ यथा वा ॥ किं तावत्सरसि सरोजमेतदारादाहोस्विन्मुख
मवभासते युवत्याः ॥ संशय्य क्षणमिति निश्चिकाय कश्चिद्विब्बोकैर्बकसहवासिनां परोक्षैः ॥१॥ पूर्व ॥श्रीव॥
त्र प्रत्यक्षमात्रमत्र तु विशेषदर्शनजन्यसंशयोत्तरप्रत्यक्षमिति भेदः ॥ अथानुमानं ॥ यथा रन्ध्रे व्यो ॥५३॥

म्रश्चलजलदधूमः स्थगयति स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः ॥ यथा विद्युज्ज्वालोल्लसितपरि
पिङ्गाश्च ककुभस्तथा मन्ये लग्नः पथिकतरुखण्डे स्मरदवः ॥ यथा वा ॥ यत्रैता लहरीचलाचलदृशो व्याप
रयन्ति भ्रुवौ यत्तत्रैव पतन्ति संततममी मर्मस्पृशो मार्गणाः ॥ तच्चक्रीकृतचापपुङ्खितशरप्रेङ्खत्करः क्रोध
नो धावत्यग्रत एव शासनधरः सत्यं तदासां स्मरः ॥२॥ पूर्वं रूपकसंकीर्णमिदमतिशयोक्तिसंकीर्णमि
ति भेदः ॥ शब्दानुमानं यथा ॥ निलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः ॥ विकसन्त्या च मालत्या गतो
ऽस्तं ज्ञायते रविः ॥ यथा ॥ सौमित्रे ननु सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽय
मुन्मीलति ॥ वत्सैतद्विदितं कथं नु भवता धत्ते कुरङ्गं यतः क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि ॥ उप
मानं यथा ॥ तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले ॥ यस्तन्वि तारकान्यासः शकटाकारमाश्रितः ॥१॥
अत्र मन्मथमिवातिसुन्दरं दानवारिमिव दिव्यतेजसं ॥ नीलराजमिव धैर्यशालिनं वीरसेनकटपार्थिवं मही
पतिं ॥२॥ पूर्वोदाहरणे उपमानमूलभूतमतिदेशवाक्यं दर्शितं ॥ अत्रातिदेशवाक्यार्थस्मारकरूपप्रत्य
क्षरूपमुपमानं फलेन सह दर्शितमिति विशेषः ॥ शब्दप्रमाणं यथा ॥ विचक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितं ॥ यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥ अ
त्र शिवः परमेष्ठिनोऽपि कारणमित्यत्र श्रुतिरूपं शब्दप्रमाणमुपन्यस्तं ॥ एवं स्मृतिपुराणागमलौ
या किकवाक्यरूपाण्यपि शब्दप्रमाणान्युदाहरणीयानि ॥ तत्र स्मृतिर्यथा ॥ कुलं कुरूणां पापानि संवृतानि य त
स्ततानि वः ॥ सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् ॥ पूर्वं श्रुतिरभिमतार्थे प्रमाणत्वेनोपन्यस्ता ॥

कुवल० इहतुस्मृतिरनभिमतार्थेनदूषणपरेणप्रमाणलयानीतेतिभेदः॥आचारात्मतुष्ट्योरपिमीमांसक
॥५४॥ कोक्तधर्मप्रमाणयोर्वेदस्यानुमापकतयाशब्दप्रमाणएवांतर्भावः॥तत्राचारप्रमाणं यथा॥महाज
नाचारपरंपरेदृशीस्वनाममनामाददतेनसाधवः॥अतोभिधातुंनतदुत्सहेपुनर्जनःकिलाचारमुच
विगायति॥१॥आत्मतुष्टिप्रमाणंयथा॥असंशयंक्षत्रपरिग्रहक्षमायदार्यमस्यामभिलाषिमेमनः
सतांहिसंदेहपदेषुवस्तुषुप्रमाणमंतःकरणप्रवृत्तयः॥२॥अत्रदुष्यंतेनात्मतुष्ट्याशकुंतलापरि
ग्रहस्यधर्म्यत्वंश्रुत्यनुमितमुन्नीयते॥एवंश्रुतिलिंगादिकमपिमीमांसकोक्तंप्रमाणंसंभवेदिहोदाह
र्त्तव्यं॥तत्रश्रुतिर्यथा॥त्वंहिनाम्नैववरदोनाधत्सेवरमुद्रिकां॥नहिश्रुतिप्रसिद्धार्थेलिंगमाद्रियते
बुधैः॥१॥अत्रकरिगिरीश्वरस्यवरदइत्यभिधानश्रुत्यासर्वाभिलषितदातृत्वंसमर्थितं॥लिंगंयथा॥
विदितं वोयथास्वार्थानमेकाश्चित्प्रवृत्तयः॥ननुमूर्तिभिरष्टाभिरित्थंभूतोस्मिसूचितः॥अत्रशिवस्यश्रु
तिप्रसिद्धसर्वोपकारकपृथिव्याद्यष्टमूर्तिपरिग्रहलिंगेनतत्प्रवृत्तीनांलोकानुग्रहैकप्रयोजनत्वंसमर्थि
तं॥लिंगस्यमूलभूतवेदानुमापकतयावैदिकशब्दप्रमाणएवांतर्भावः॥एवंलौकिकलिंगानामपिलौकिक क
शब्दोन्नायकतयालौकिकशब्दप्रमाणएवांतर्भावः॥अतः॥लोलभ्रूलतयाविपक्षदिगुपन्यासेविधु
तंशिरस्तद्वृत्तांतपरीक्षणेकृतनमस्कारोविलक्ष्यस्थितः॥ईषत्ताम्रकपोलकांतिनिमुखेदृष्ट्यानतःपाद
योरुत्सृष्टोगुरुसन्निधावपिविधिर्दूभ्यांनकालेभवतः॥१॥इत्यादिचेष्टारूपंप्रमा णांतरंनाशंकनीयं॥ ॥शिव॥
कुचित्शब्दप्रमाणकल्पनयाचमत्कारोयथा॥किमसुभिर्ग्लपितैर्जडमन्यसेमयिनिमज्जतुभीमसु ॥५४॥

सोरसोभावाभासश्लेषरूप्यते॥सयत्रपरस्यांगंतत्रऊर्जस्वितु॥भावस्यप्रशाम्यदवस्थाभावशांतिः॥तस्याःपरां
गत्वेसमाहितं॥भावस्योद्गमावस्थाभावोदयः॥द्वयोर्विरुद्धयोर्भावयोःपरस्परस्पर्धाभावसंधिः॥बहूनांभा
वानांपूर्वपूर्वोपमर्देनोत्पत्तिर्भावशबलता॥एतेषांमितरांगत्वेभावोदयादयस्त्रयोलंकाराः॥तत्रैतेषुदु र
दाहरणं॥मुनिर्जयतियोगींद्रोमहात्माकुंभसंभवः॥येनैकचुलुकेदृष्टौदिव्यौतौमत्स्यकच्छपौ॥अत्रमु
निविषयरतिरूपस्यभावस्याद्भुतरसांगं॥यथा॥अयंसरसनोत्कर्षपीनस्तनविमर्दनः॥नाभ्यूरुजघन
स्पर्शनीवीविस्रंसनःकरः॥८॥अत्रकरुणास्यशृंगारांगं॥१॥प्रेयोलंकारएवभावालंकारउच्यते॥सयथा॥ लं
कदावाराणस्याममरतटिनीरोधसिवसन्वसानःकौपीनंशिरसिनिदधानोंजलिपुटं॥अयेगौरीनाथत्रि
पुरहरशंभोत्रिनयनप्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान्॥अत्रशांतिरसस्यकरोतिपदस
वितर्कितारव्योव्यभिचारिभावांगं॥यथा॥अत्युच्चाःपरितःस्फुरंतिगिरयःस्फारास्तथांभोधयस्तानेतान
पिबिभ्रतीकिमपिनश्रांतासितुभ्यंनमः॥आश्चर्येणमुहुर्मुहुःस्तुतिमितिप्रस्तौमियावद्भुवस्तावद्बिभ्र
दिमांस्मृतस्तवभुजोवाचस्ततोमुद्रिताः॥७॥अत्रप्रभुविषयरतिभावस्यवसुमतीविषयरतिभावांगं॥
ऊर्जस्वितंयथा॥त्वत्प्रत्यर्थिवसुंधरेशतरुणीःसंत्रासतःसत्वरंयांतीर्वीक्ष्यविलुंठितुंसरभसंयाताःकि
राताःवने॥तिष्ठंतिस्तिमितःप्ररूढपुलकास्तेविस्मृतोपक्रमास्तासामुन्नतलेस्तनेरतितरांलोलेरपांगै
रपि॥७॥अत्रप्रभुविषयरतिभावस्यशृंगाररसाभासांगं॥यथा॥त्वयिलोचनगोचरंगतेसफलंज
न्मनृसिंहभूपते॥अजनिष्टममेतिसादरंबुधविज्ञापयतिद्विषांगणाः॥अत्रकवेःप्रभुविषयस्यर

ता मनः ॥ मम मुकिल श्रुतिमाहृतदर्थिकानलमुखेंदुपरो बिबुधः स्मरः ॥ अत्र म्रियमाणानां मनश्चंद्रं प्रविश
तीत्येतदर्थिकायाः श्रुतेर्नलमुखचंद्रविषयत्वे कल्पिते तथाव्याख्यातस्मरवाक्यं प्रमाणं तयोपन्या
स्तं ॥ अर्थापत्तिर्यथा ॥ निर्णेतुं शक्यमस्तीति मध्यं तव नितंबिनि ॥ अन्यथानोपपद्येत पयोधर[illegible]भर
स्थितिः ॥ यथा वा ॥ व्यंबलीयान्यद्विहेतुरगमादपूरयत्सा जलधिं न जाह्नवी ॥ गंगौघनिभकीर्तिस्ते कंबुकं
धरासवर्णमिणेः कथमन्यथा स्यात् ॥ १ ॥ अनुपलब्धिर्यथा ॥ स्फुटमसदवलग्नं तन्वि निश्चिन्वते ते तदनुप ले
लभमानास्तर्कयंतोपि लोकाः ॥ कुलगिरियुग्मं यद्विनाधारमास्ते नदिहमकरकेनोरिंदुजालं प्रतीम ॥
॥ २ ॥ संभवो यथा ॥ अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखं ॥ किं तु त्वदग्रे शरणागतानां परा
भवो नाथ न तेनुरूपः ॥ २ ॥ यथा ॥ येनामकेचिदिह नः प्रथयंत्यवज्ञां जानंति ते किमपि ता[illegible]ति नैष यत्नः ॥ उ त्र
त्पत्स्यतेस्ति मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ १ ॥ यथा ॥ भ्रातः पांथ कुतो भवान्नगर
तो वार्त्तान वा वर्तते बाढं ब्रूहि युवा पयोदसमये त्यक्त्वा प्रियां जीवति ॥ सत्यं जीवति जीव[illegible]तीति कथिता वार्ता मयापि
श्रुता विस्तीर्णा पृथिवी जनोपि विविधः किं किं न संभाव्यते ॥ १ ॥ अत्राद्योदाहरणे अभूतपूर्वं मम भावि किं वे
ति संभवप्रमाणसिद्धोर्थो दर्शितः ॥ द्वितीयोदाहरणे संभवोपपादकं कालानंत्यादिकमपि दर्शितं ॥ तृतीयो
दाहरणे संभवोपि कंठोक्त इति भेदः ॥ ऐतिह्यं यथा ॥ कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ॥ एति जी
वंतमानंदो नरं वर्षशतादपि ॥ १ ॥ अत्र लौकिकी गाथेयमित्यनिर्दिष्टप्रवक्तृक[illegible]वादपारंपर्यं तादर्शितं ॥
अथैतेषामलंकाराणां यथासंभवं क्वचित्मेलने लौकिकालंकाराणां मेलन इव क्षीरतुलातिन्यायोपलंभान्नर

कुवल०
॥५५॥

श्री

सिंहन्यायेन पृथगलंकारावस्थितौ तन्निर्णयः क्रियते ॥ तत्र तिलतंडुलन्यायेन स्फुटावगम्यभेदालंकारमेल
ने संसृष्टिः ॥ नीरक्षीरन्यायेनास्फुटभेदालंकारमेलने संकरः ॥ स चांगांगिभावेन समप्राधान्येन संदेहेन एकवाचका
नुप्रवेशेनेति चतुर्विधः ॥ एवं नरसिंहालंकाराः पंचालंकाराः ॥ अत्र संसृष्टिर्यथा ॥ कुसुमसौरभलोभपरिभ्र
मद्भ्रमरसंभ्रमसंभृतशोभया ॥ चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्यया ॥१॥ अत्र शब्दा
लंकारानुप्रासयमकयोः संसृष्टिः ॥ लिंपतीव तमोंगानि वर्षतीवांजनं नभः ॥ असत्पुरुषसेवेव दृष्टिर्निष्फल
तां गता ॥ अत्रोत्प्रेक्षयोरुपमायाश्चार्थालंकाराणां संसृष्टिः ॥ आनंदमंथरपुरंदरमुक्तमाल्यं मौलौ ह
ठेन निहितं महिषासुरस्य ॥ पादांबुजं भवतु मे विजयाय मंजुमंजीरशिंजितमनोहरमंबिकायाः ॥ अत्र श
ब्दार्थालंकारयोरनुप्रासोपमयोः संसृष्टिः ॥ अंगांगिभावसंकरो यथा ॥ तलेष्ववेपंत महीरुहाणां छायास्त
रामारुतकंपितानां ॥ शशांकसिंहेन तमोगजानां लूनाकृतीनामिव गात्रखंडाः ॥१॥ अत्र शशांकसिंहेनेति
तमोगजानामिति च रूपकं ॥ यद्यप्यत्र शशांक एव सिंहस्तमांस्येव गजा इति मयूरव्यंसकादिसमासाश्र
यणेन रूपकं तथैव शशांकः सिंह इव तमांसि गजा इवेत्युपमितिसमासाश्रयणेनोपमापि वक्तुं शक्या ॥
तथापि लूनाकृतीनामिति विशेषणानुगुण्याद्रूपकसिद्धिः ॥ तस्य हि विशेष्यप्राधान्येन सहान्वयेन ष्य
भाव्यं न तु गुणेन ॥ गुणानां च परार्थत्वादसंबंधः ॥ समत्वात्स्यादिति न्यायादुपमितिसमासाश्रयणे त
स्य पूर्वपदार्थप्रधानत्वात् शशांकस्य तमसां च प्राधान्यं भवेत् ॥ तत्र न विशेषणमुख्यार्थान्वयस्वारस्य ॥शिव॥
मस्ति ॥ स्वरूपनाशरूपोपचरितार्थकृतिलवनकर्तृत्वान्वयसंभवेपि मुख्यार्थान्वयस्वारस्यमेवादरणीयं ॥ ॥५५॥

यं

कुवल० विशेषात्॥ समासोक्तिगर्भतां विना चुंबनोत्प्रेक्षाया निरालंबनत्वात्॥ ततश्चात्रापि उत्प्रेक्षासमासोक्त्योरेक
॥५६॥ कालयोः समप्राधान्यं॥ यद्यप्यत्रोपमाभ्यां शशिनिशागतावेव धर्मौ समर्थ्येते॥ न तु शशिनायकयोर्निशाना
यकयोश्च साधारणौ॥ साधारणधर्मसमर्पणं चोत्प्रेक्षासमासोक्त्योरपेक्षितं॥ उत्प्रेक्षायाः प्रस्तुताप्रस्तुतसा
धारणगुणक्रियारूपनिमित्तसापेक्षत्वात्॥ समासोक्तेर्विशेषणसाम्यमूलकत्वात्॥ तथापि वाक्योक्तोपमार्थ
यामिव करस्य मरीचिभिरिवेत्यन्वयांतरमभ्युपगम्यान्वयभेदलब्धस्य प्रस्तुताप्रस्तुतयोरेकैकविषयस्या
र्थद्वयस्य समासोक्तोपमायां सरोजसदृशं लोचनमिति समासांतरमभ्युपगम्य समासभेदलब्धार्थद्वय
स्य चाभेदाध्यवसायेन साधारण्यं संपाद्य तयोरुत्प्रेक्षासमासोक्त्यंगतानिर्वाह्या॥ यद्वा॥ इह प्रकृतको म
टिगतानां मरीचितिमिरसरोजानामप्रकृतकोटिगतानामंगुलीकेशसंचयलोचनानां च तनुदीर्घविरल
त्वनीलनीरंध्रत्वकांतिमत्त्वादिना सदृशानां प्रातिस्विकरूपेण भेदवदनुगतसादृश्यप्रयोजकरूपेणाभेदो
प्यस्ति स चात्र विवक्षित एव भेदाभेदोभयप्रधानोपमेत्यालंकारिकसिद्धांतात्॥ तत्र च प्रयोजकांशनिष्कृ
र्षन्यायेनाभेदगर्भतांशोपजीवनेन साधारण्यं संपाद्य प्रधानभूतोत्प्रेक्षासमासोक्त्यंगतानिर्वाह्या॥ नहि
प्रकाशशीतापनयनशक्तिमतः सौरतेजसः शीतापनयनशक्तिमात्रेण शीतालूपयोगिता न दृष्टा॥ एवम
नभ्युपगमेपि च॥ पांड्योयमंसार्पितलंबहारः क्लृप्तांगरागो हरिचंदनेन॥ आभाति बालातपरक्तसानुः सनिर्झरो
द्गार इवाद्रिराजः॥ इत्याद्युपमापि न निर्वहेत्॥ न ह्यत्राद्रिराजपांड्ययोरुपमानोपमेययोरनुगतसाधारणधर्मो ॥शिव॥
निर्दिष्टः॥ एकत्र बालातपनिर्झरावन्यत्र हरिचंदनहाराविति धर्मभेदात्॥ तस्मात्तत्रातपहरिचंदनयोर्निर्झ ॥५६॥

यो

रहारयोश्च सदृशयोरभेदांशोपजीवनमेव गतिः॥ पिनष्टीव तरंगाग्रैः समुद्रः फेनचंदनं॥ तदादाय करैरिंदुर्लि
पतीव दिगंगनाः॥ अत्रोत्प्रेक्षयोः कालभेदेपि समप्राधान्यं॥ अन्योन्यनिरपेक्षवाक्यद्वयोपात्तत्वात्॥ तदादायेति
फेनचंदनस्य रूपकमात्रोपजीवनेन पूर्वोत्प्रेक्षानपेक्षणाच्च॥ न चैवं लिंपतीव तमोंगानीतिवदुत्प्रेक्षाद्वयस्य संसृ
ष्टिरेवेति येभिवाच्यं॥ लोकप्रसिद्धपेषणलेपनपौर्वापर्यच्छायानुकारिणोत्प्रेक्षाद्वयपौर्वापर्येण चारु
तातिशयसमुन्मेषतः संसृष्टिवैषम्यात्॥ तस्माद्दर्शादिवदेकफलसाधनतया समप्रधानमिदमुत्प्रेक्षाद्वयं॥
एवं समप्रधानसंकरोपि व्याख्यातः॥ संदेहसंकरो यथा॥ शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरू
पं जह्नुकन्यावतीर्णा॥ इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥ इयमिति स
र्वनाम्नायमजं वृतवतींदुमती विशिष्टरूपेण निर्दिश्यते तदा बिंबभावापन्नधर्मविशिष्टयोः सदृशयोरै प्रतिबिंब
क्यारोपरूपनिदर्शना॥ यदि तेन सा स्वरूपेणैव निर्दिश्यते बिंबभूतो धर्मस्तु पूर्वप्रस्तावात्समगुणयोगप्रीतपद
त्तिपोरविशेषणाल्लभ्यते॥ तत्र प्रस्तुतधर्मिणोस्तद्वृत्तांते प्रतिबिंबभूताप्रस्तुतवृत्तांतारोपरूपं ललितमित्य
या नध्यवसायात्संदेहः॥ विलीयेंदुः साक्षादमृतरसवापी यदि भवेत्कलंकस्तत्रत्यो यदि च विकचेंदीवरवनं॥ ततः स्ना
न क्रीडाजनितजडभावैरवयवैः कदा विन्मुंचेयं मदनशिखिपीडापरिभवं॥ अत्र यद्येतावत्साधनं संपद्येत तत
दा तापः शाम्यतीत्यर्थे कविसंरंभश्चेत्तदेतदुपात्तसिध्यर्थमूह इति संभावनालंकारः॥ एतावत्साधनं क
दापि न संभवत्येवातस्तापशांतिरपि गगनकुसुमकल्पेत्यर्थे कविसंरंभश्चेदुपात्तमिथ्यात्वसिध्यर्थमिंदु
ष्याद्यर्थांतरकल्पनारूपा मिथ्याध्यवसितिरित्युभयथा संभवात्संदेहः॥ एवं॥ सिक्तं स्फटिककुंभांतःस्थि

कुवलं०
॥५७॥

सिश्रेती रुतैजलैः॥ मौक्तिकैस्तैल्लुता सूतेतसुष्पैस्तोसमं यशः॥ इत्यादिष्वपि संभावना मिथ्याध्यवसितिसंदेह
संकरो द्रष्टव्यः॥ मुखेन गरलं मुंच मूले वसति वैष्णवी॥ फलसंदोहगुरुणा तरुणा किं प्रयोजनं॥ अत्र महो
रगवृत्तांते वर्ण्यमाने राजद्वाररूढखलवृत्तांतोपि प्रतीयते॥ तत्र किं वस्तुतस्तथाभूतो रगवृत्तांत एव प्रस्तु
ते प्रस्तुतः खलवृत्तांतः स्तुतः प्रतीयत इति समासोक्तिः॥ यद्वा॥ प्रस्तुतखलवृत्तांतप्रत्यायनाया प्रस्तुतम
होरगवृत्तांतकीर्तनम प्रस्तुतप्रशंसा॥ यद्वा॥ वर्ण्यमानमहोरगवृत्तांतकीर्तनेन समीपस्थितखलमर्मो
द्घाटनं क्रियत इत्युभयस्यापि प्रस्तुतत्वात् प्रस्तुतांकुर इति संदेहः॥ एकवाचकानुप्रवेशसंकरस्तु शब्दा
र्थालंकारयोरेवेति लक्ष्यत इव काव्यप्रकाशकारस्तदुदजहार॥ स्पष्टोच्छ्वसत्किरणकेसरसूर्यबिंबवि
स्तीर्णकर्णिकमथो दिवसारविंदं॥ श्लिष्टाष्टदिग्दलकलापमुखावतारबद्धांधकारमधुपावलि संचु
कोच॥ अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ॥ यत्रैकस्मिन् श्लोके पदभेदेन शब्दार्थालंकारयोः स्थितिस्तत्र तयोः
संसृष्टिरिह तु संकर इति॥ अलंकारसर्वस्वकारस्तु एकस्मिन् वाचकेनुप्रवेशो वाच्ययोरेवालंकारयोः स्वारसि
कवाच्यप्रतियोगिकत्वाद्वाचकस्येति मत्वा र्थालंकारयोरप्येकवाचकानुप्रवेशसंकरमुदाजहार॥ समुद्दरश्री ध्व
तिरंगनाभिन्यमंदमारब्धमृदंगवाद्ये। उद्यानवापीपयसीव यस्यामेणीदृशो नाट्यगृहे रमंते॥ अत्र नाट्य
गृहवापीपयसोः समुद्दरेत्यादिविशेषणेन शब्दसाम्यं श्लेषः॥ अमंदमारब्धेत्यादिविशेषणेर्थसाम्यं उपमा
तदुभयमेकस्मिन्निवशब्देनुप्रविष्टमिति तद्दूषणमन्यामहे॥ समुद्दरेत्यादिविशेषणेपि श्लेषभित्तिकाध्य ॥शिव॥
भेदाध्यवसायरूपातिशयोक्तिलभ्यस्य धर्मसाम्यस्यैव तत्रैव शब्दप्रतिपाद्यतया शब्दसाम्यस्य तदप्रति ॥५७॥

का

स्वरूपनाशकोंशीकरेण प्रवृत्तया लक्षणया मलातिशयोक्त्या रूपकसिद्धिः॥ तच्च रूपकमुत्प्रेक्षाया अंगं॥ तदु
त्थापकत्वात्॥ रूपकाभावे हि शिखायाः लूनगात्रत्वे उड्डीवेपंते त्येतावदुक्तावुपमेव सिध्येत्॥ वेपनादिसाध
र्म्यात्॥ न च्छायानां सद्यः कृत्तगात्रत्वं तादात्म्यसंभावनारूपोत्प्रेक्षा अनुशयांकेन लूनाकृतीनां तमसां गा
त्रत्वे उड्डीनावेपंत इत्येतावदुक्तावपि सिध्यत्युत्प्रेक्षा॥ तादात्म्यसंभावनोपयुक्तलूनाकृतिरूपाधिकविशे
षणोपादानात्॥ सत्यं॥ तथोक्तावाकृतिलवनादिधर्मरूपकार्यसमारोपनिमित्ता शशांकतमसोर्हंतृहंतव्यचे
तनवृत्तांतसमारोपरूपा समासोक्तिरुत्प्रेक्षणीया॥ एवमुक्तौ रूपकमिति विशेषः॥ एवमत्रातिशयोक्तिरूप
कोत्प्रेक्षाणामंगांगिभावेन संकरः॥ समप्राधान्यसंकरो यथा॥ अवतु नः सवितुस्तुरगावली समतिलंघित
तुंगपयोधरा॥ स्फुरितमध्यगतारुणनायका मरकतैकलतेव नभःश्रियः॥ अत्र पयोधरादिश्लेषमूला
तिशयोक्त्युपोद्भूतयोत्थाप्यमाने वसवितृतुरगावलयोर्मरकतैकवल्लीतादात्म्योत्प्रेक्षा नभोलक्ष्म्यां नायिका
व्यवहारसमारोपरूपसमासोक्तिगर्भैवोत्थाप्यते॥ पयोधरश्लेषस्योभयोपकारकत्वात्॥ तत उत्प्रेक्षासमासोक्त्यो
रेकः कालः परस्परापेक्षया चारुत्वसमुन्मेष उभयोस्तुल्य इति विनिगमनाविरहात्समप्राधान्यं॥ यथा॥ अं
गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः॥ कुड्मलीकृतसरोजलोचनं चुंबतीव रजनीमुखं शशी॥
अत्रांगुलीभिरिवेति वाक्योक्तोपमया तत्स्थायिपाठात् मुखकुड्मलीकरणलिंगानुगुण्यात् उपमितिसमासाश्रय
णेन लब्धया सरोजलोचनमिति समासोक्त्योपमया गर्भितयोत्थाप्यमाने शशिकरेकनिशामुखचुंबनोत्प्रे
क्षानिशाशशिनोर्दंपतिव्यवहारे समारोपरूपसमासोक्तिगर्भैवोत्थाप्यते॥ उपमयोरुभयत्रोत्थापकत्वा

स

पाद्यत्वात्॥श्लेषभित्तिकाभेदाध्यवसायेनधर्मसाम्यलाभानंगीकारे॥अहो रागवतीसंध्याजहातिस्व-
यमंबरमित्यादिश्लिष्टविशेषणसमासोक्त्युदाहरणे विशेषणसाम्याभावे नसमासोक्त्यभावप्रसं-
गात्॥शब्दसाम्यस्यैवशब्दप्रतिपाद्यत्वेपित स्योपमावाचकस्यैवप्राप्त्याश्लेषवाच्यत्वाभावाच्च॥शब्द-
तोर्थतोवाकथंचित्संमतसाम्यप्रतिपादने सर्वविधेप्युपमालंकारस्वीकारात्॥अन्यथा॥यथाप्रह्लादनाच्चं-
द्रः प्रतापात्तपनो यथा॥तथैवसोभूदन्वर्थो राजाप्रकृतिरंजनात्॥इत्यत्राप्युपमा न स्यात्॥नहि अन्वर्थ- अत्र
नामरूपशब्दसाम्यं विना किंचिदर्थसाम्यं कविविवक्षितमस्तितस्माद्यत्रैकस्मिन्नर्थे प्रतिपाद्यमाने अलं-
योगा कारद्वयलक्षणौद्वलंकारद्वयप्रतीतिस्तत्र तयोरलंकारयोरेकवाचकानुप्रवेशः॥यथा॥विधुकरपरिरं-
भादात्तनिष्यंदपूर्णैः शशिदृषदुपक्लृप्तैरालवालैस्तरूणां॥विफलितजलसेकप्रक्रियागौरवेण व्यरचि
सहृतचित्तस्तत्र भैमीवनेन॥अत्र हि प्रतिपाद्यमानोर्थः समृद्धिमद्वस्तुवर्णनमुदात्तमिति लक्ष-
णानुसारादुदात्तालंकाररूपः॥असंबंधे संबंधकथनमतिशयोक्तिरिति लक्षणादतिशयोक्तिश्च॥
नवसर्वत्रोदात्तस्यासंबंधे संबंधवचनरूपत्वेनाभिधानमिति न विविक्तालंकारद्वयलक्षणासमावेशोस्ती-
ति वाच्यं॥दिव्यलोकगतसंपत्समृद्धिवर्णनादिष्वतिशयोक्त्यस्पृष्टस्योदात्तस्य दर्शनाद्दारिद्र्यादि
कृ विषयवर्णने चोदात्तास्पृष्टाया अतिशयोक्तेश्चापरिविविक्ततयादिश्रौतेस्तयोर्थे हाथवशासंपृक्त
समावेशापानंगांगिभावः॥एकेनापरस्यानुत्थापनात्॥स्वातंत्र्यपारतंत्र्यविशेषादर्शनाच्च॥नापिस

स्पर

कुवल० ॥५८॥ मप्राधान्यं ॥ यैः शब्दैरिह संबंधिवस्तुप्रतिपाद्यते तैरेव तस्यैव वस्तुनो संबंधे संबंधरूपस्य प्रतिपाद्यमानतया
भिन्नप्रतिपादकशब्दव्यवस्थितभेदाभावात् ॥ नापि संदेहसंकरः ॥ एकालंकारकोट्यां तदन्यालंकारकोटिप्र
तिक्षेपाभावात् ॥ तस्मादिहोदात्तातिशयोक्त्योरेकवाचकानुप्रवेशलक्षणः संकरः ॥ क्वचित्संकराणाम
पि संकरो दृश्यते ॥ यथा ॥ मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः प्रातः प्रांगणसीम्नि मंथर
चलद्बालांघ्रिलाक्षारुणाः ॥ दूराद्दाडिमबीजशंकितधियः कर्षंति केलीशुका यद्विद्वद्भवनेषु भोजनृपतेस्त
त्यागलीलायितं ॥ १ ॥ अत्र तावद्विदुषां संपत्समृद्धिवर्णनमुदात्तालंकारः ॥ तन्मूलको बालांघ्रिलाक्षारुणा
इत्यत्र तद्गुणालंकारः ॥ तत्रैव वक्ष्यमाणभ्रांत्युत्थापकः पदार्थहेतुककाव्यलिंगालंकारश्चेति तयोरेक वा
चकानुप्रवेशसंकरः ॥ तन्मूलः शंकितधिय इत्यत्र भ्रांतिमदलंकारः ॥ ताभ्यां चोदात्तालंकारस्याहतान्नीतइति
तयोश्च तस्य चांगांगिभावसंकरः ॥ एवं विद्वद्गेहवैभवस्य हेतुमतो राज्ञो वितरणविलासस्य हेतोश्चाभेदक व
थनं हेत्वलंकारः ॥ स च राज्ञो वितरणविलासस्य निरतिशयोत्कर्षाभिव्यक्तिपर्यवसायी ॥ एतावन्मात्रेणै
कविसंरंभश्चेदुक्तरूपोदात्तालंकारपरिपुष्टे हेत्वलंकारे विश्रांतिः ॥ कीदृशी संपत्स्यादिति प्रश्नोत्तरतयाभि
रतिशयैश्वर्य वितरणरूपाप्रस्तुतकार्यनिबंधनाप्रस्तुतप्रशंसालंकारे विश्रांतिः ॥ कार्यस्यापि वर्णनी
यत्वेन प्रस्तुतत्वाभिप्रायेणु प्रस्तुतांकुरे विश्रांतिः ॥ अत्र विशेषानध्यवसायात् संदेहसंकरः ॥ किंच
विद्वद्गृहवैभववर्णनस्य संबंधे संबंधकथनरूपतयातिशयोक्तेरुदात्तालंकारेण सहैकवाचकानुप्रवे ॥शिव॥ ॥५८॥

२ मुखेन तदीयसंपदुत्कर्षप्रशंसने कविसंरंभश्चेत्कार्य २

॥ निरतिशयवितरणोत्कर्षपर्यवसायिनो हेत्वलंकारस्यात्यद्भुतातथ्यौदार्यवर्णनात्मकयात्युक्त्या सहैकवाचकानुप्रवेशसंकरः ॥ १

श संकरः ॥ तन्मूलकस्याप्रस्तुतप्रशंसालंकारस्य प्रस्तुतांकुरालंकारस्य वा राजसंपत्समृद्धिवर्णनात्मको
दात्तालंकारेण सहैकवाचकानुप्रवेशसंकरः ॥ वाचकत्वांशस्य प्रतिपादकमात्रपरतया व्यंजकसाधार-
ण्यादेषां च त्रयाणामेकवाचकानुप्रवेशसंकराणां समप्राधान्यसंकरः ॥ न ह्येतेषां परस्परमन्यत्रांग-
त्वमस्ति ॥ उदात्तादिमात्रस्यैव हेत्वलंकारादिचारुतापादकत्वे नातिशयोक्तिसंकरस्यांगतयोनपेक्षण अ
न्य त ॥ एवमेतत्र श्लोके चतुर्णामपि संकराणां यथायोग्यं संकरः ॥ एवमन्यत्राप्युदाहरणांतराण्यूह्यानि ॥
अमुं कुवलयानंदमकरोदप्पयदीक्षितः ॥ नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः ॥ चंद्रालोको विजयतां श-
रदागमसंभवः ॥ हृद्यः कुवलयानंदो यत्प्रसादादभूदयं ॥ ॥ इति श्रीमदद्वैतविद्याचार्यश्रीमद्वैत
कुलजलधिकौस्तुभश्रीरंगराजाध्वरीद्रवरदसूनोरप्पयदीक्षितस्य कृतिः कुवलयानंदः समाप्तः ॥
इदं पुस्तकं गोविंदभट्टेन लिखितं ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ छ ॥ छ ॥ श्रीरामचंद्राय नमः ॥ हरि ॥

श्रीगणेशाय नमः ॥ कुवलयानंदानुक्रमणिका लिख्यते ॥ पें २

उत्तुंगशैलशिखरस्थितपादपादपस्य काकोपि पक्वफलमालभते सपक्षः ॥ सिंहोपि मत्तकरिकुंभविदारसमर्थः
उच्छिष्टमात्र लभते खलु पक्षहीनः ॥१॥ क्षोणीशाश्रयिणां परोपकरणाभावादवाप्तश्रियां कार्पण्यात्सुधिया
मनध्ययनलोयूनां प्रवासाश्रयात् ॥ शीर्णानां जगदीशभक्तिविरहादायुर्वृथा गच्छतीत्येवं त्रास समुद्भवः
प्रतिदिनं नादो वेदत्युच्चकैः ॥२॥ उच्चैःकल्याणवाहीकरंजितवसुधः सर्वदापूर्णकामो कोशापेक्षी परस्मात्
उचितबहुकथाचित्रपाकानुभोगी ॥ विख्यातः कर्णतुल्यो वचसि च नकदुस्तत्परः पुण्यलोके इत्थं राजा
धिराजत्वमिव तव रिपुस्तत्र कंप्रन्तीमः ॥३॥ पीतोगस्त्येन तातश्चरणतलहतो वल्लभो येन रोषात् आबा
ल्यात् द्विप्रवर्गैर्वदनसरसिजे धारिता वैरिणी मे ॥ गेहं मे छेदयंतः प्रतिदिनमुमाकांतपूजानिमित्तं ॥ तस्मा
त्खिन्ना सदाहं द्विजवरसदनं नाथ सत्यं त्यजामि ॥४॥
कीर्तिस्तेन वदंतिका मुररिपोः कस्थितामिंदिरां त्वामाह स्म यदा विविस्मगिरिजाः शुल्वाध नरीश्वरः ॥ ब्रह्मा भूच्चतुराननः सुरपतिः
श्चक्षुःसहस्रं दधौ स्कंधो मूढमति विवाह विमुखो धत्ते कुमारव्रतं ॥१॥
यस्य स्वर्णश्रियगुरुतरा नित्यमायांति पत्नात्तेन त्याय्य स्तनुगुणतया न क्षेपतव्यश्चैत् । वह्निहि ग्रासोभ
वति विधिनो मथनबधनं या लक्ष्मी प्रेप्सो जगदधिपते रत्नसादृशोसरस्यात् ॥१॥